महाराजाधिराज-कामेश्वरसिंह-ग्रन्थमाला--१३

म० म० उमापत्युपाध्यायकृता

स्मृतिदीपिका

(म०म०उमापतिकृतशुद्धिनिर्णयसहिता)

विद्यावारिधि(डॉ०) श्रीशशिनाथझाकृत-

शुद्धिकौमुदी

सहिता

सम्पादकः

विद्यावारिधि(डॉ०) श्रीशशिनाथझा

प्रकाशकः

कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः, दरभङ्गा

महाराजाधिराज-कामेश्वरसिंह-ग्रन्थमाला--१३

म० म० उमापत्युपाध्यायकृता

स्मृतिदीपिका

(म०म०उमापतिकृतशुद्धिनिर्णयसहिता)

विद्यावारिधि(डॉ०) श्रीशशिनाथझाकृत-

शुद्धिकौमुदी

सहिता

सम्पादकः

विद्यावारिधि(डॉ०) श्रीशशिनाथझा

प्रकाशकः

कामेश्वरसिंह - दरभङ्गा - संस्कृत - विश्वविद्यालयः, दरभङ्गा

सर्वाधिकारः संरक्षितः

प्रथमसंस्करणम्—१०००
प्रकाशनवर्षम्–शाके १९०७ (१९८५ ई०)
मूल्यम्—१६/०० (षोडश रूप्यकाणि)।

उत्तर प्रदेश संस्कृत संस्थान
पुस्तकालय
पं० सं० 14885
संस्कृत भवन, लखनऊ

प्रस्तुतग्रन्थाः

	ग्रन्थाः	ग्रन्थकारः	पृष्ठेषु
१	स्मृतिदीपिका	म० म० उमापतिः	१--२४
२	शुद्धिनिर्णयः	म० म० उमापतिः	२५--५२
३	शुद्धिकौमुदी	डॉ० श्रीशशिनाथझा	२५--११०

प्रकाशकः
का० सिं० द० संस्कृतविश्वविद्यालयः, कामेश्वरनगरम्, दरभंगा

मुद्रकः—रमणप्रेस, बंगलागढ़, दरभङ्गा

आमुखम्

अथेयं प्रकाश्यते महाराजाधिराज - कामेश्वरसिंहग्रन्थमाला-यास्त्रयोदशपुष्परूपेण म० म० उमापत्युपाध्यायकृता स्मृतिदी-पिका। लघुरपि गुणगौरवमण्डितेयं, प्रमुखधर्मशास्त्रीयविषयसं-ग्राहिकात्वेन, मान्याचार्यनिर्मितात्वेन, मान्यतया च। धर्मशास्त्रे प्रविश्यमानेनच्छात्रेण स्मृतिदीपिकेयमवश्यमभ्यसनीया। मूल-रूपेण सकलसिद्धान्ता अत्र निहिताः सन्ति।

उमापतिनामकस्यैव अपरविदुषः कृतिः शुद्धिनिर्णयोऽप्यत्र समा-वेशितः। स्मृतिदीपिकायामपि शुद्धिविचारः संक्षिप्ततया समागतः, तत्पूरक एव शुद्धिनिर्णयः। शुद्धिनिर्णयस्य च पूरिका वर्ततेऽत्र शुद्धिकौमुदी। इयं स्वयं सम्पादकेन डा० शशिनाथझाशर्मणा सपरिश्रमं साधु प्रणीता। धर्मशास्त्रीयवचनानामाशयप्रकाश-नेऽत्र झामहोदयस्य पटुत्वं दर्शनीयमस्ति। शुद्धिविषये प्रायशः सकलसन्देहनिराकरणार्थमत्र प्रयासो विहितः सफलीभूत इति मन्ये।

उमापतिनामका मिथिलायामनेके विद्वांसो जाताः। तेषु कस्य को ग्रन्थ इति सपरिचयं विवेचना कृता सम्पादकेन। एतेन धर्म-तत्त्वेनसहैवैतिहासिकादितत्त्वमपि प्राप्यतेऽत्र।

सम्पादको धन्यवादार्हो येन सपरिश्रमं ग्रन्थोयं सम्पाद्य विदुषां पुरत उपस्थापितः। मन्ये, ग्रन्थेनानेन सर्वे धर्मानुरागिण उपकृता भवेयुरिति शम्।

डॉ० जयमन्तमिश्रः
कुलपतिः
१८-२-८५

भूमिका

मन्वादिस्मृतीनां विस्तरत्वान्नाल्पायासेन सामान्यरूपेण सकलधर्मशास्त्रीयप्रमुखविषयाणामनुगमः कर्त्तुं शक्यते। धर्मस्य तत्त्वं गुहायां निहितमिति सरलरीत्या कस्यचिदाप्तजनस्य संगृहीत-निर्णय एव शरणं भवति जिज्ञासूनाम्। अतो बहुभिः कृपालुभि धर्मविद्भिस्तथा प्रयासो विहितः। तत्र म० म० उमापत्युपाध्यायेन 'स्मृतिदीपिका' रचिता, या स्वल्पकलेवरतया सामान्यजिज्ञासूनां, धर्मतत्त्वान्वेषिणां, धर्मशास्त्रे प्रविविक्षूणां बालानां धर्मकर्त्तव्यनिर्णयमिच्छूनाञ्च परमोपकारिका वर्तते। अत्र धर्मशास्त्रीयविषयाणां संक्षिप्तविवरणपुरस्सरं तन्निर्णयः प्रस्तुतो विद्यते तथा सदाचार-शुद्धि-श्राद्ध-दाय-जयाजय-दिव्य-प्रायश्चित्त-व्रतानां विवेचनं जातम्। ईदृशाल्पकलेवरतया निबद्धे ग्रन्थे एतावतां विषयाणां समावेशो नान्यत्र दृश्यते। अतोऽस्या उपयोगिता स्वतःसिद्धा।

अस्या एकैव मातृका अस्माकं विश्वविद्यालय उपलब्धा, यदाधारेणैतत् संस्करणं साधु सम्पन्नम्। मातृका द्वादशपत्रात्मिका मिथिलाक्षरमयी स्पष्टा पूर्णा वर्तते। परन्तु बहुत्र भ्रष्टपाठतया तदुद्धाराय नानाग्रन्थानुशीलनमेव शरणीकृतम्।

प्रणेता चास्या स्मृतिदीपिकाया म० म० उमापत्युपाध्यायोऽत्र स्वपरिचयं नैव प्रस्तौति। परन्तु एतत्कृतप्रायश्चित्तनिर्णयस्यान्तेऽयं स्वकुलपरिचयं प्रस्तौति। स्मृतिदीपिकायाः प्रायश्चित्तनिरूपणप्रकरणं बहुत्र अक्षरशः प्रायश्चित्तनिर्णयग्रन्थादुद्धृतम्। तेन उभयग्रन्थस्यैककर्तृत्वं सिद्धम्। अयं हि 'पवौलिवढिआम'वंशीयो मैथिलमनीषी बभूव। एतन्मातामहो म० म० रघुनाथोपाध्यायो म० म० गोकुलनाथोपाध्यायस्य पुत्र आसीत्।

मिथिलायामुमापतिनामकाः त्रयो विद्वांसः प्रसिद्धाः—

(१) दरिहरावंशीयः पदार्थीयदिव्यचक्षुःकारः परिजातहरणनाटककर्त्ता म० म० उमापत्युपाध्यायः कोइलखग्रामकृतवासः (१६२५ ई०)।

(२) करमहावंशीयः शुद्धिनिर्णयकारः म० म० उमापत्युपाध्यायः (१७०० ई०)।

(३) पवौलिवंशीयः स्मृतिदीपिका - प्रायश्चित्तनिर्णय - सारसंग्रहकारः म० म०उमापत्युपाध्यायो मङ्गलवनीग्रामकृतवासः (१७५० ई०)।

विशेषविवरणार्थमत्रैव ग्रन्थे २७ संख्यकपृष्ठतः २६ संख्यकपृष्ठं यावद् द्रष्टव्यम्।

स्मृतिदीपिकाकर्त्तुः वंशावली प्रस्तूयते—

पवौलि--वढिआमवंशः

सिद्धपुरुषः शिवदत्तः
|
भानुदत्तः
|
सुधापतिः
|
म० म० रघपतिः
|
म० म० हरपतिः (गोकुलनाथस्य गुरुः[1])
|
सुकविकृष्णपतिः
|
चतुरचन्द्रपतिः | सर्वज्ञ गरीबः | बादरि प्रसिद्धः कविनन्दीपतिः | लक्ष्मीपतिः

(सर्वज्ञ गरीबः)
|
म० म० उमापतिः
|
म० म० कन्हाइः (१८६० ई०)

स्मृतिदीपिकाया विविधविषयसंवलितत्वेऽपि शुद्धिविचारः प्रायश्चित्तविचारश्च मुख्यौ। तत्र प्रायश्चित्तविषये स्वयमेवानेन प्रायश्चित्तनिर्णयनामा ग्रन्थः प्रणीतः। शुद्धिविषये एतत्समाननामकेन म० म० उमापतिशर्मणा पूर्व-

---

१ कृष्णकेलिमालानाटिका - नन्दीपतिकृता [प्रस्तावना]।

मेव शुद्धिनिर्णयो रचितो यस्य सारगर्भतया लोकप्रियता सर्वप्रसिद्धैव। अतएव स्मृतिदीपिकया सहैव समावेशितोऽत्र। तत्र तार्किकवरश्रीकृष्णठक्कुरकृतटिप्पणीसमावेशोपि कृतः। परन्तु तत्र स्मृतिवचनानि नोपन्यस्तानि, अथ च अशौचविषयशुद्धिविचार एव प्रस्तुतः। तदतिरिक्तानि शरीर - भूमि - जल - वह्नि - द्रव्य - प्रभृतीनां शुद्धीकरणानि न प्रतिपादितानि। अतएव मया सर्वविधशुद्धिविधानवचनानि संगृह्य विवृत्य च शुद्धिकौमुदी विरच्य अत्र समावेशिता। मत्कृतशुद्धिकौमुद्यां बहुषु स्थलेषु साम्प्रतिकसमस्यानां समाधानार्थम् ऊहः कृतः। किञ्च मिथिलाव्यवहारानुरूपं स्मृतिवचनार्थः प्रतिपादितः। व्यवहारस्य मूलान्वेषणं प्रचुरतया कृतम्।

स्मृतिदीपिकायाः प्रतिलिप्यादिकरणेन मान्याः पं० श्रीधर्मनाथझा महोदया अतीव धन्यवादार्हाः सन्ति। एतान् प्रति कृतज्ञतां वच्मि। शुद्धिनिर्णयसम्पादने गुरुवद्वन्दनीयाः पं० श्रीरामसेवकझामहोदयाः परामर्शदानेनानुगृहीतवतन्त इति तान् प्रति कृतज्ञोऽस्मि।

शुद्धिकौमुद्यां प्रणीतायां दृष्टिपूतकारिणे गुरुवद्वन्दनीयाय पं० श्रीमदर्जुनझामहोदयाय ससम्मानं धन्यवादं ददामि। कतिपयेषु स्थलेषु मतभेदेपि बहुत्र तत्परामर्शानुसारं संशोधनमपि कृतम्।

अन्ते धर्मशास्त्रानुरागिभ्योऽनवधानजातत्रुट्यर्थं क्षमायाचनां विदधे। आशासे चानेन मम परिश्रमेण बुधाः प्रमोदमाप्स्यन्ति, छात्राश्चोपकृता भविष्यन्तीति।

महाशिवरात्रिः शाके १९०७ डॉ० शशिनाथझा
स्नातकोत्तर व्याकरणभाषाविज्ञानविभागः १८-२-१९८५ ई०
का० सिं० द० संस्कृतविश्वविद्यालयः,
दरभङ्गा

विषयसूची

क्र० पृष्ठम्

(१)	स्मृतिदीपिका म० म० उमापतिकृता	१--२४
१	सदाचारः	१
२	श्राद्धम्	२
३	शुद्ध्यशुद्धी	३
४	दायविभागः	६
५	विभागः	७
६	स्त्रीधनम	८
७	पुत्रधनाधिकारः	८
८	सृष्टिविभागः	९
९	जयपराजयौ	९
१०	दिव्यम्	१२
११	दिव्यकालाः	१३
१२	प्रायश्चित्तनिर्णयः	१४
१३	धेनुमूल्यनिर्णयः	१५
१४	व्रतनिर्णयः	१५
१५	सान्तपनम्	१६
१६	पञ्चगव्यम्	१६
१७	ऋषिचान्द्रायणम्	१७
१८	वीरासनम्	१७
१९	षाण्मासिकम्	१८
२०	मासव्रतम्	१८
२१	गर्भिणीवधप्रायश्चित्तम्	१८
२२	पञ्चविधकर्तृत्वनिर्णयः	१९

क्र०	विषयः	पृष्ठम्
२३	रोधादिनिमित्तगोवधे	२०
२४	प्राजापत्यस्यापवादः	२०
२५	चान्द्रायणव्रतम्	२०
२६	अस्थिभङ्गप्रायश्चित्तम्	२०
२७	अपालनप्रायश्चित्तम्	२१
२८	एकहायन्यादिवधे	२२
२९	शिशुचान्द्रायणम्	२२
३०	गोवधापवादः	२२
३१	प्रायश्चित्तापवादः	२३
(२)	शुद्धिनिर्णयः म० म० उमापतिकृतः	२५--५२
१	शुद्धिनिर्णयस्य विषयसूची	२६
२	प्राक्कथनं सम्पादकस्य	२७
३	चातुर्वर्ण्याशौचम्	३१
४	सपिण्डादिलक्षणम्	३२
५	अशौचसङ्करः	३२
६	विदेशस्थाशौचम्	३३
७	बालाद्यशौचम्	३४
८	स्त्र्यशौचम्	३५
९	गर्भस्रावाशौचम्	३७
१०	मृत्युविशेषाशौचम्	३७
११	सपिण्डाद्यशौचम्	३९
१२	निर्हरणाद्यशौचम्	४१
१३	दाहप्रकारे पर्णनरदाहः [टि०]	४२
१४	स्नानशुद्धिः [टि०]	४३
१५	अधिकारिणः	४५
१६	त्रयोदशपुत्राः [टि०]	४५

क्र०	विषयः	पृष्ठम्
१७	अनधिकारिण:	४८
१८	संन्यासिनामेकोद्दिष्टम्	४९
१९	अशौचान्ते मुण्डनम् [टि०]	५१
२०	टिप्पणीकारपरिचय:	५२
(३)	शुद्धिकौमुदी डॉ०श्रीशशिनाथझाकृता	५३--११०
१	शुद्धिकौमुद्या विषयसूची	५४
२	मङ्गलाचरणम्	५५
३	शुद्धिपदार्थः	५५
४	सपिण्डादिमरणाशौचम्	५५
५	विगोत्राशौचम्	६०
६	बालकमरणाशौचम्	६३
७	कन्यामरणाशौचम्	६५
८	जननाशौचम्	६५
९	अशौचसङ्करः	६७
०	गर्भस्रावाद्यशौचम्	७०
११	विदेशस्थाशौचम्	७०
१२	शववाहनाद्यशौचम्	७२
१३	शस्त्रहतादीनामशौचम	७४
१४	रोदनाद्यशौचम्	७६
१५	अनशौचिनः	७७
१६	श्राद्धाधिकारिणः	७८
१७	अशौचे त्याज्यात्याज्यकर्माणि	८५
१८	अशौकान्तिमदिनकर्त्तव्यम्	८८
१९	शरीरशुद्धिः	८९
२०	रजस्वलाशुद्धिः	९२
२१	स्पर्शदोषशुद्धिः	९३

क्र०	विषयः	पृष्ठम्
२२	आसन - शय्यादिशुद्धिः	९७
२३	वस्त्रशुद्धिः	९८
२४	गृहशुद्धिः	९९
२५	अन्नादिशुद्धिः	१००
२६	स्वतःशुद्धानि	१०२
२७	सुवर्णादिद्रव्यशुद्धिः	१०४
२८	भूमिशुद्धिः	१०५
२९	जलशुद्धिः	१०६
३०	वह्निशुद्धिः	१०८
३१	देशाचारशुद्धिः	११०
३२	ग्रन्थकारपरिचयः	११०

म० म० उमापतिकृता

स्मृतिदीपिका

ओम् नमो गणेशाय ।

प्रणम्य सच्चिदानन्दं श्री उमापतिशर्म्मणा ।
नानानिबन्धमाश्रित्य क्रियते स्मृतिदीपिका ॥१॥

सदाचारः

सर्वेषां व्यवहाराणां व्यवस्थैव गरीयसी ।
व्यवस्था यादृशी यस्य सिद्धिर्भवति तादृशी ॥२॥
यस्मिन्देशे य आचारः पारम्पर्य्यक्रमागतः ।
श्रुतिस्मृत्यविरोधेन सदाचारस्स उच्यते ॥३॥
एका लिङ्गे गुदे तिस्रस्तथा वामकरे दश ।
उभयोस्सप्त दातव्या मृदः शुद्धिमभीप्सता ॥४॥
प्रादेशमात्रं विज्ञेयं वस्वङ्गुलमथापि वा ।
तस्माच्छुष्कमथार्द्रं वा भक्षयेद्दन्तधावनम् ॥५॥
प्रतिपद्दर्शषष्ठीषु नवम्याञ्चैव सत्तमाः ।
दन्तानाङ्काष्ठसंयोगो दहत्यासप्तमङ्कुलम् ॥६॥
यथाऽहनि तथा प्रातर्नित्यं स्नायादनातुरः ।
दन्तान् संशोध्य नद्यादौ गेहे चेत्तदमन्त्रवत् ॥७॥
प्रातस्सन्ध्यां सनक्षत्रामुपासीत यथाविधि ।
सादित्यां पश्चिमां सन्ध्यामर्द्धास्तमितभास्कराम् ॥८॥
एतत्सन्ध्यात्रयं प्रोक्तं ब्रह्मण्यं यदधिष्ठितम् ।
यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते ॥९॥
सन्ध्यालोपस्य चाकर्त्ता स्नानशीलश्च यस्सदा ।
तद्दोषा नोपसर्पन्ति वैनतेयमिवोरगाः ॥१०॥

शातातपः-- तर्पणन्तु शुचिः कुर्य्यात्प्रत्यहं स्नातको द्विजः ।
देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम् ॥११॥

श्राद्धम्

एकोद्दिष्टम्परित्यज्य पार्वणं यः समाचरेत् ।
सदैव पितृहा स स्यान्मातृभ्रातृविनाशकः ॥१२॥
अमायाञ्च क्षयो यस्य प्रेतपक्षेऽथ वा पुनः ।
सपिण्डीकरणादूर्ध्वन्तस्योक्तः पार्वणो विधिः ॥१३॥

ऋष्यशृङ्गः--देये पितॄणां श्राद्धे तु अशौचं जायते यदि ।
अशौचे तु व्यतीते वै तेषां श्राद्धं प्रदीयते ॥१४॥
शचीभूतेन दातव्यं या तिथिः प्रतिपद्यते ।
सा तिथिस्तस्य कर्त्तव्या नैवान्या वै कदाचन ॥१५॥
स्मरणं कीर्त्तनङ्केलिः प्रेक्षणङ्गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृतिरेव च ॥१६॥
सपिण्डीकरणं यावत्प्रेतश्राद्धानि षोड़श ।
पृथङ्नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचित् ॥१७॥
सर्वेषान्तु मतंकृत्वा ज्येष्ठेनैव तु यत्कृतम् ।
द्रव्येण चाविभक्तेन सर्वैरेव कृतम्भवेत् ॥१८॥
द्वादश प्रतिमास्यानि आद्यं षण्मासिके तथा ।
सपिण्डीकरणञ्चैव प्रेतश्राद्धानि षोड़श ॥१९॥
श्राद्धविघ्ने समुत्पन्ने क्षयाहेऽविदिते तथा ।
एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेषतः ॥२०॥

वायुपुराणे—शुक्लपक्षस्य पूर्वाह्णे श्राद्धङ्कुर्याद्विचक्षणः ।
कृष्णपक्षेऽपराह्णे तु रौहिणन्तु न लङ्घयेत् ॥२१॥

ब्राह्मे—पूर्वाह्णे मातृकं श्राद्धमपराह्णे तु पैतृकम् ।
एकोद्दिष्टन्तु मध्याह्ने श्राद्धङ्कुर्याद्विचक्षणः ॥२२॥

विष्णुः—सन्ध्या-रात्र्यो र्न कर्त्तव्यं श्राद्धन्तु विचक्षणैः।
तयोरपि च कर्त्तव्यं यदि स्याद्राहुदर्शनम् ॥२३॥
मृते भर्त्तरि या नारी समारोहेद्धुताशनम्।
साऽरुन्धती समाचारात् स्वर्गलोके महीयते ॥२४॥
देशान्तरमृते तस्मिन् साध्वी तत्पादुकाद्वयम्
निधायोरसि संशुद्धा प्रविशेज्जातवेदसम् ॥२५॥

विष्णुः—कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः।
नामकर्मणि बालानां चूडाकर्मणिके तथा ॥२६॥
सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने।
नान्दीमुखं पितृगणं पूजयेत्प्रयतो गृही ॥२७॥

कात्यायनः—कर्मादिषु च सर्वेषु मातरस्सगणाधिपाः।
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः ॥२८॥

विष्णुः—स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मणि।
पिण्डानोद्वाहनात्तेषान्तस्याभावे तु तत्क्रमात् ॥२९॥

अथ शुद्धाशुद्धी

शुद्धयेद्विप्रो दशाहेन द्वादशाहेन भूमिपः।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ॥३०॥

वृहस्पतिः—दशाहेन सपिण्डास्तु शुद्ध्यन्ति प्रेतसूतके।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुद्ध्यन्ति गोत्रजाः ॥३१॥

कश्यपः—रात्रावेव समुत्पन्ने मृते रजसि सूतके।
पूर्वमेव दिनङ्ग्राह्यं यावन्नं वोदितो रविः ॥३२॥
उदिते तु यदा सूर्ये नारीणान्दृश्यते रजः।
जननं वा विपत्ति र्वा यस्याहस्तस्य शर्वरी ॥३३॥
जननेप्येवमेव स्यान्निपुणं शुद्धिमिच्छताम्।
सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकम् ॥३४॥

पैठीनसिः--सूतिकां पुत्रजननीं विंशतिरात्रेण स्नातां सर्वकर्माणि कारयेत्, मासे स्त्रीजननीम् ॥३५॥

देवलः—सन्ध्यां पञ्चमहायज्ञं नैत्यकं स्मृतिरेव च।
तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया ॥३६॥

कात्यायनः—सूते तु कर्मणान्त्यागस्सन्ध्यादीनां विशेषतः।
होमः सूते तु कर्त्तव्यः शुष्कान्नेनाथवा फलैः ॥३७॥

मनुः— जाते कुमारे तदहः कामङ्कुर्यात्प्रतिग्रहम्।
हिरण्य-धान्य-गो-वासस्तिलान्न-गुड़-सर्पिषाम् ॥३८॥

ब्राह्मे—देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम्।
आयान्ति तस्मात्तदहः पुण्यं षष्ठञ्च सर्वदा ॥३९॥

दक्षः— सद्यश्शौचन्तथैकाहस्त्र्यहश्चतुरहस्तथा।
षड् दश द्वादशाहश्च पक्षो मासस्तथैव च ॥४०॥
मरणान्तन्तथा चान्यद्दश पक्षास्तु सूतके।
उपन्यासक्रमेणैव तान् प्रवक्ष्याम्यशेषतः ॥४१॥
व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा।
क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य विशेषतः ॥४२॥
व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः।
श्राद्धत्याग-विनाशस्य भस्मान्तं सूतकम्भवेत् ॥४३॥

कूर्मे --आद्यानां यौगपद्ये तु ज्ञेया शुद्धिर्गरीयसी।
मरणोत्पत्तियोगे तु गरीयो मरणम्भवेत् ॥४४॥

ब्राह्मे---आद्यं भागद्वयं यावत्सूतकस्य तु सूतके।
द्वितीये पतिते ह्याद्यात्सूतकाच्छुद्धिरिष्यते ॥४५॥
अत उर्द्ध्वन्द्वितीयात्तु सूतकान्ताच्छुचिर्भवेत्।
एवमेव विचार्यं स्यान्मृतके सूतकान्तरे ॥४६॥

ऋष्यशृङ्गः--देये पितॄणां श्राद्धे तु अशौचं जायते यदि।
अशौचे तु व्यतीते वै तेषां श्राद्धं प्रदीयते ॥४७॥

देवलः--परतः परतः शुद्धिरघबृद्धौ विधीयते ।
स्याच्चेत्पञ्चतमादाहुः पूर्वेणानुविशिष्यते ॥४८॥
विष्णुः -रात्रिशेषे दिनद्वयं, प्रभाते तु दिनत्रयं,
पुत्रजन्मनि विंशतिः, स्त्रीजन्मनि मासादूर्ध्वम् ॥४९॥

मनुः--विगतञ्च विदेशस्थं श्रृणुयाद्यो ह्यनिर्द्दशम् ।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ॥५०॥
अतिक्रान्ते दशाहे तु त्रिरात्रमशुचि र्भवेत् ।
संवत्सरे व्यतीते वै स्पृष्ट्वैवापो विशुद्धयति ॥५१॥
बृहस्पतिः--देशान्तरं वदन्त्येके षष्टियोजनमायतम् ।
चत्वारिंशद्वदन्त्येके त्रिंशदेके तथैव च ॥५२॥

मनुः- वाचो यत्र विभिद्यन्ते गिरि र्वा व्यवधायकः ।
महानद्यन्तरं यत्तु तद्देशान्तरमुच्यते ॥५३॥
देशनाम नदीभेदान्निकटेऽपि भवेत्तु यत् ।
तत्तु देशान्तरं प्रोक्तं स्वयमेव स्वयम्भुवा ॥५४॥
आदन्तजननात्सद्य आचूडान्नैशिकी स्मृता ।
त्रिरात्रमाव्रतादेशाद्दशरात्रमतःपरम् ॥५५॥
शूद्रे त्रिवर्षान्न्यूने तु मृते शुद्धिस्तु पञ्चभिः ।
अत ऊर्द्ध्वं मृते शूद्रे द्वादशाहो विधीयते ॥५६॥
षड्वर्षान्तमतीतस्तु शूद्रः संम्रियते यदि ।
मासिकन्तु भवेच्छौचमित्याङ्गिरसभाषितम् ॥५७॥

शङ्खः- अनूढभार्यः शूद्रस्तु षोडशाद्वत्सरात्परम् ।
मृत्युं समधिगच्छेच्चेन्मासन्तस्यापि बान्धवाः ॥५८॥

ब्राह्मे- अनतीत-द्विवर्षस्तु प्रेतो यत्रापि दह्यते ।
अतिमोहाभिभूतैश्च देशसाधर्म्यमार्द्दवात् ॥५९॥
अशौचं ब्राह्मणानान्तु त्रिरात्रञ्चैव विद्यते ।
राज्ञामेकादशाहन्तु वैश्यानां द्वादशाहिकम् ॥६०॥

अपि विंशतिरात्रन्तु शूद्राणां भवति क्रमात् ।
आजन्मनस्तु चूडान्तं यत्र कन्या विपद्यते ॥६१॥
सद्यश्शौचम्भवेत्तत्र सर्ववर्णेषु नित्यशः ।
ततो वाग्दानपर्यन्तं यावदेकाहमेव च ॥६२॥
अतः परं प्रवृद्धानां त्रिरात्रमिति निश्चयः ।
वाक्प्रदाने कृते यत्र ज्ञेयञ्चोभयतस्त्र्यहम् ।।६३॥
पितुर्वरस्य च ततो दातृणा भर्त्तुरेव हि ।
स्वजात्युक्तमशौचं स्यात्सूतके मृतके तथा ॥६४॥

मरीचिः --मृते पितरि पुत्रेण क्रिया कार्या प्रयत्नतः ।
बहवःस्यु र्यदा पुत्राः पितुरेकत्र वासिनः ॥
सर्वेणैकमतङ्कृत्वा ज्येष्ठेनैव कृतम्भवेत् ॥६५॥

अथ दायविभागः

नारदः—विभागोऽर्थस्य पित्र्यंशः पुत्रैर्यत्र प्रकल्प्यते ।
दायभागमितिप्रोक्तं तद्विवादपदं बुधैः ॥६६॥

मनुः—ऊर्द्ध्वं पितुश्च मातुश्च समेत्य भ्रातरस्समम् ।
भजेरन् पैतृकं ऋक्थमनीशास्त हि जीवतोः ॥६७॥
द्रव्ये पैतामहोपात्ते स्थावरे जङ्गमे तथा ।
सममंशित्वमाख्यातं पितुः पुत्रस्य चोभयोः ॥६८।
अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्ज्जितम् ।
विद्या शौर्यादिना प्राप्तं तत्र स्वाम्यं पितुः स्मृतम् ॥६९॥
पैतामहमनासाद्य स्वशक्त्या यदुपार्ज्जितम् ।
दानं वा स्वेच्छया कुर्याद्भागं वाऽपि ततो धनात् ॥७०॥

कात्यायनः—अविभक्ते मृते पुत्रे तत्सुतं ऋक्थभागिनम् ।
कुर्वीत जीवनं येन लब्धं नैव पितामहात् ॥७१॥
लभेतांशं स पित्र्यन्तु पितृव्याद्वाऽपि तत्सुतात् ।
स एवेशस्तु सर्वेषां भ्रातॄणां न्यायतो भवेत् ॥७२॥

लभेत तत्सुतो वाऽपि निवृत्तिः परतो भवेत् ।
सम्प्राप्तव्यवहाराणां विभागस्तु विधीयते ।।७३।।
पुंसाञ्च षोडशे वर्षे जायते व्यवहारिता ।
पितृकृतविभागे पुत्राणां व्यवहारविशिष्टानामनुमतिः ।।७४।।

बृहस्पतिः—पितृऋक्थहराः पुत्रास्सर्व एव समांशिनः ।
विद्याकर्मयुतस्त्वेषामधिकं लब्धुमर्हति ।।७५।।

व्यासः—साधारणं समाश्रित्य यत्किञ्चिद्वाहनादिकम् ।
शौर्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः ।।७६।।

क्षेत्रं साधारणं त्यक्त्वा योऽन्यदेशं समाश्रितः ।
तद्वंशस्यागतस्यांशः प्रदातव्यो न संशयः ।।७७।।
येषान्तु न कृताः पित्रा संस्कारविधयः क्रमात् ।
कर्त्तव्या भ्रातृभिस्तेषां पैतृकादेव वै धनात् ।।७८।।
कन्याभ्यस्तु पितृद्रव्याद्देयं वैवाहिकं वसु ।
अपुत्रस्य तु कन्याया धर्मतः पितृवद्भवेत् ।।७९।।

अथ विभागः

मनुः—विद्याधनन्तु यद्यस्य तत्तस्यैव धनम्भवेत् ।
मैत्रमौद्वाहिकञ्चैव माधुपर्किकमेव च ।।८०।।
त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैत्रिकः ।
परभक्तप्रदानेन प्राप्तविद्यो यदन्यतः ।।८१।।
तया प्राप्तञ्च यद्द्रव्यं विद्याप्राप्तन्तदुच्यते ।
उपन्यस्तेषु यल्लब्धं विद्यया बलपूर्वकम् ।।८२।।
शिष्यादार्त्विज्यतः प्रश्नात्सन्दिग्धस्य च निर्णयात् ।
स्वज्ञानशंसनाद्वादाल्लब्धं प्राध्ययनाच्च यत् ।।८३।।

विद्याधनन्तु तद्विभागेन विभज्यत इति ।
कात्यायनः—कुटुम्बं विभृयाद्भ्रातुर्यो विद्यामधिगच्छति ।
भागं विद्याधनात्तस्मात्स लभेताश्रुतोऽपि सन् ।।८४।।

मनुः – पत्यौ जीवति यो नार्या, अलङ्कारो धृतोभवेत् ।
न तं भजेरन् दायादा भजमानाः पतन्ति ते ॥८५॥

स्त्रीधनविषये--

उच्चया कन्यया सार्द्धं पत्युः पुत्रगृहेऽथ वा ।
भ्रातुस्सकाशात्पित्रो र्वा लब्धं सौदायिकं स्मृतम् ॥८६॥
सौदायिकं धनम्प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते ।
यस्मात्तदा नृशंस्यार्थं तैर्द्दत्तं तत्प्रजीवनम् ॥८७॥
मनुः—भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि तत् ।
सा यथाकाममश्नीयाद्द्याद्वा स्थावरादृते ॥८८॥
सौदायिकं धनम्प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते ।
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि ॥८९॥

तथा च स्त्रीणां पितृकुललब्धे स्थावरे यथेष्टं दानादौ स्वातन्त्र्यम् । पतिदत्ते स्थावरे पतिसङ्क्रान्ते स्थावरे च अस्वातन्त्र्यम् । किन्तु यथेष्टभोगमात्रम् ॥९०॥

अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता ।
भुञ्जीतामरणात्क्षान्ता दायादा उद्ध्र्वमाप्नुयुः ॥९१॥

दायादः प्रतिदायादः ।

अध्यग्न्यध्यावाहनिकं दत्तञ्च प्रीतिपूर्वकम् ।
मातृ भ्रातृ पितृदत्तं षड्विधं स्त्रीधनं स्मृतम् ॥९२॥
न भर्त्ता नैव च सुतो न पिता भ्रातरस्तथा ।
आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः ॥९३॥
दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके ।
गृहीतं स्त्रीधनं भर्त्ता न स्त्रियै दातुमर्हति ।९४॥

अथ पुत्रधनाधिकारः

याज्ञवल्क्यः—पत्नी च दुहिता चैव पितरौ भ्रातरस्तथा ।
तत्सुतो गोत्रजो बन्धुः शिष्यश्च ब्रह्मचारिणः ।

एषामभावे पूर्वेषान्धनभागुत्तरोत्तरः ॥९५॥
बहवो ज्ञातयो यत्र सकुल्या बान्धवास्तथा ।
यस्त्वासन्नतरस्तेषां सोऽनपत्यधनं हरेत् ॥९६॥

अथ सृष्टिविभागः

बृहस्पतिः— विभक्तो यः पुन. पुत्रो भ्राता चैकत्र संस्थितः ।
पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते ॥९७॥
मनुः— विभक्ताम्सह जीवन्तो विभजेच्च पुनर्यदि ।
समस्तत्र विभागः स्याज्ज्यैष्ठ्यन्तत्र न विद्यते ॥९८॥

अथ जयपराजयौ

अर्थिना सम्प्र क्तो वा प्रत्यर्थि प्रहितोऽपि वा ।
यो यस्यार्थे विवदते तयोर्ज्जय-पराजयौ ॥९९॥
कुलस्त्री-बालकोन्मत्त-जडार्त्तानाञ्च बान्धवाः ।
पूर्ववादोत्तरे कुर्य्युर्न्नियुक्तो भृतकस्तथा ॥१००॥
ब्रह्महत्या सुरापाने स्तेये गुर्वङ्गनागमे ।
अन्येषु लघुवादेषु प्रतिवादी न दीयते ॥१०१॥
वादिभ्यामभ्यनुज्ञातमशेषं फलके स्थितम् ।
ससाक्षिकं लिखेत्पत्रे प्रतिपत्त्या तु वादिनौ ॥१०२॥
स्वल्पाक्षरः प्रभूतार्थो निस्सन्दिग्धो निराकुलः ।
विरोधिकारणैर्युक्तो विरोधिप्रतिबोधकः ॥१०३॥
प्रतिज्ञादोष-निर्मुक्तं साध्यं सत्कारणान्वितम् ।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः ॥१०२॥
अप्रसिद्धं निराबाधं निरर्थं निःप्रयोजनम् ।
असाध्यं वा विरुद्धं वा राजा पक्षं विवर्ज्जयेत् ॥१०५॥
सद्यः कृतेषु कार्येषु सद्य एव विवादयेत् ।
कालातीतेषु वा कालं दद्यात्प्रत्यर्थिने प्रभुः ॥१०६॥
पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् ।
अव्याख्यागम्यमित्येवमुत्तरन्तद्विदो विदुः ॥१०७॥

व्यास.—मिथ्यैतन्नातिजानामि मम तत्र न सन्निधिः ।
अजातश्चापि तत्काले मिथ्यैवं स्याच्चतुर्विधम् ॥१०८॥

बृहस्पतिः—मिथ्या सम्प्रतिपत्तिश्च प्रत्यवस्कन्दनन्तथा ।
प्राङ्न्यायश्चोत्तराः प्रोक्ताश्चत्वारश्शास्त्रवेदिभिः ।
अर्थिनाभिहितो योऽर्थः प्रत्यर्थी यदि तं तथा ।
प्रपद्य कारणं ब्रूयात्प्रत्यवस्कन्दनं हि तत् ॥११०॥

नारदः—अधर्मं पूर्वपक्षस्य यस्मिन्नर्थवशाद्भवेत् ।
विवादे साक्षिणस्तस्य प्रष्टव्याः प्रतिवादिनः ॥१११॥
गुरावभिहिते हेतौ प्रतिवादिक्रिया भवेत् ।
दुर्बले वादिनः प्रोक्तास्तुल्ये पूर्वक्रियैव च ॥११२॥

बृहस्पतिः - आचारेणावसन्नोऽपि पुनर्लेखयते यदि ।
सोऽभिधेयो जितः पूर्वं प्राङ्न्यायः परिकीर्तितः ॥११३॥
प्राङ्न्याये कारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियाम् ।
मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेत् ॥११४॥

प्रत्याकलिते—आहूतः प्रपलायी च मौनी साक्षी पराजितः ।
स्ववाक्यप्रतिपन्नश्च हीनवादी चतुर्विधः ॥११५॥
प्रपलायी त्रिपक्षे तु मौनक्तसप्तभिर्दिनैः ।
साक्षिभिन्नस्तत्क्षणेन प्रतिपन्नश्च हीयते ॥११६॥
साक्षिणस्तु समुद्दिश्य यस्तान्नैव निगादयेत् ।
त्रिंशद्दिने त्रिपक्षाद्वा हानिस्तस्योपजायते ॥११७॥
राजदैवकृतो दोषस्तस्मिन्काले यदा भवेत् ।
अवधित्यागमात्रेण न भवेत्स पराजितः ॥११८॥
अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः ।
आहूतः प्रपलायी च हीनः पञ्चविधःस्मृतः ॥११९॥
व्याजेनैव तु यत्रासौ दीर्घकालमभीप्सति ।
सोपदेशन्तु तद् विद्याद्वादहानिपदं स्मृतम् ॥१२०॥

सन्धौ बृहस्पतिः – पूर्वोत्तरेऽभिलिखिते प्रक्रान्ते कालनिर्णये ।
द्वयोस्सन्तप्तयोस्सन्धिः श्वादयः पिण्डयोरिव ॥१२१॥
साक्षिसभ्यविकल्पन्तु भवेद्यत्रोभयोरपि ।
दोलायमानौ यौ सन्धिङ्कुर्यातां तौ विलक्षणौ ॥१२२॥
प्रमाणसमता यत्र भेदः शास्त्रचरित्रयोः ।
तत्र राजाज्ञया सन्धिरुभयोरपि शस्यते ॥१२३॥

क्रियादाने कात्यायनः—
लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृतम् ।
लेशोद्देशस्तु युक्तिः स्याद्दिव्यानां हविषादयः ॥१२४॥
द्वयोर्विवदतोरर्थे द्वयोः सत्सु च साक्षिषु ।
पूर्वपक्षो भवेद्यस्य भवेद्यस्तस्य साक्षिणः ॥१२५॥
निवृत्तव्यवहाराणां प्रमाणमफलम्भवेत् ।
लिखितं साक्षिणो वाऽपि पूर्वमावेदितं न चेत् ॥१२६॥
क्रियाम्बलवतीन्त्यक्त्वा दुर्बलां यः समाश्रयेत् ।
स जयेऽवधृते सद्यः पुनर्न्नाप्नोति सत्क्रियाम् ॥१२७॥
दिवाकृते स्वकार्येषु ग्रामेषु नगरेषु च ।
सम्भवः साक्षिणाञ्चैव न दिव्या भवति क्रिया ॥१२८॥
लिखितं साक्षिवादे च सन्दिग्धं यत्र जायते ।
अनुमाने च सङ्क्रान्ते दिव्यन्तत्र प्रकल्पयेत् ॥१२९॥
अरण्ये निर्ज्जने रात्रावन्तर्वेश्मनि या क्रिया ।
न्यासापह्नवने चैव दिव्या सम्भवति क्रिया ॥१३०॥
प्राणान्तिकं विवादेषु विद्यमानेषु साक्षिषु ।
दिव्यमालम्बते वादी न पृच्छेत्तत्र साक्षिणः ॥१३१॥

साक्षिप्रश्ने – देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान् ।
उदङ्मुखान् प्राङ्मुखाद्वा पूर्वाह्णे वा शुचिः शुचीन् ॥१३२॥

मनुः – सभायां साक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ ।
प्राड्विवाकः प्रयुञ्जीत विधिनानेन सान्त्वयन् ॥१३३॥

न कालहरणं प्रोक्तं राज्ञा साक्षिप्रभाषणे ।
महान्दोषो भवत्यस्माद्धर्मव्यावृत्तिलक्षणम् ॥१३४॥

नारदः—आहूय साक्षिणः पृच्छन्नियम्य शपथैर्भृशम् ।
समस्ताद्विहिताचारान् विज्ञातार्थान् पृथक् पृथक् ॥१३५॥
स्वभावोक्तं वचस्तेषां ग्राह्यं दोषविवर्जितम् ।
उक्ते तु साक्षिणो राज्ञा न प्रष्टव्याः पुनः पुनः ॥१३६॥
सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः ।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ॥१३७॥
द्यौर्भूमिरापो हृदयं गाश्च चन्द्रानलानिलाः ।
रात्रिः सन्ध्ये च धर्मश्च वृत्तज्ञास्सर्वदेहिनाम् ॥१३८॥
अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते ॥१३९॥
यस्य दृश्येत सप्ताहादुक्तसाक्ष्यस्य साक्षिणः ।
रोगोऽग्नि र्ज्ञातिमरणं सत्यं दाप्योदमञ्छमः ॥१४०॥
यस्योचुस्साक्षिणस्सत्यां प्रतिज्ञां स जयी भवेत् ।
अन्यथा वादिनो यस्य ध्रुवन्तस्य पराजयः ॥१४१॥

अथ दिव्यम्

उपोषितन्तथा स्नातमार्द्रवाससमागतम् ।
कारयेत्सर्वदिव्यानि नृप - ब्राह्मण - सन्निधौ ॥१४२॥
पूर्वाह्णे सर्वदिव्यानां प्रधानमनुकीर्तितम् ।
स्तेय-साहसयोर्दिव्यं स्वल्पेप्यर्थे प्रकल्पयेत् ॥१४३॥
विषं सहस्रेऽपहृते पादोने च हुताशनः ।
त्रिभागहीने सलिलमर्द्धोदये धटस्सदा ॥१४४॥
चतुश्शताऽभियोगे तु दातव्यं तप्तमाषकम् ।
त्रिशते तण्डुला देयाः कोशश्चैव तदर्द्धके ॥१४५॥
शतेहृतेऽपहृते च दातव्यं धर्मशोधनम् ।
गो-चोरस्य प्रदातव्यं सभ्यैः फलावहेलनम् ॥१४६॥

एषा संख्या निकृष्टानां मध्यमानां द्विगुणा स्मृता ।
चतुर्गुणोत्तमानाञ्च कल्पनीया परीक्षकैः ।१४७।।
नासहस्राद्धरेत्फालं न विषं न तुलान्तथा ।
नृपार्थेष्वभिशापे च वहेयुः शुचयस्तथा ।।१४८।।

दिव्यकालाः

चैत्रो मार्गशिरश्चैव वैशाखस्तु तथैव च ।
एते साधारणा मासा दिव्यानामविरोधिनः ।।१४९।।
घटस्सर्वर्त्तुकः प्रोक्तो वाते वाति विवर्ज्जयेत् ।
वह्निः शिशिरहेमन्तवर्षासु परिकीर्त्तितः ।।१५०।।
शरद्ग्रीष्मे च सलिले हेमन्ते शिशिरे विषम् ।
न शीते तोयशुद्धिः स्यान्न ग्रीष्मे च हुताशनः ।।
न प्रावृषि विषं दद्याद्वाते वाति तुलां नृप ।।१५१।।

मनुः– पूर्वाह्णेऽग्निपरीक्षास्यात्पूर्वाह्णे च धटोभवेत् ।
मध्याह्ने च जलन्देयं धर्मतत्त्वमभीप्सता ।।१५२।।
दिवसस्य तु पूर्वाह्णे कोशशुद्धिर्विधीयते ।
रात्रौ तु पश्चिमे यामे विषं देयं सुशीतले ।।१५३।।

शपथे–अचातुर्द्दशकादह्नो यस्य नो राजदैवतम् ।
व्यसनञ्जायते घोरं स ज्ञेयः शपथे शुचिः ।।१५४।।
उदर्ध्वं यस्य द्विसप्ताहाद्वैकृतं सुमहद्भवेत् ।
नाभियोज्यस्स विदुषाङ् कृतकालव्यतिक्रमे ।।१५५।।

नारदः—त्रिरात्रात्सप्तरात्राद्वा द्विसप्ताहादथापि वा ।
वैकृतं यस्य दृश्येत पापकृत्स तु मानवः ।।१५६।।
तस्यैकस्य न सर्वस्य जनस्य यदि तद्भवेत् ।
रोगोऽग्नि र्ज्ञातिमरणं दद्यादर्थन्दमञ्छमम् ।।१५७।।

पितामहः—ज्वरातीसारविस्फोट-शूलास्थिपरिपीडनम् ।

नेत्ररुग्गलरोगश्च तथोन्मादः प्रजायते ।।
पुत्रदारधनानाञ्च स शुद्धः स्यान्न संशयः ।।१५८।।

अथ प्रायश्चित्तनिर्णयः

अबुद्ध्वा धर्मशास्त्राणि प्रायश्चित्तं वदन्ति ये ।
प्रायश्चित्ती भवेत्पूतस्तत्पापन्तेषु गच्छति ।।१५९।।
अनर्च्चितैरनाहूतैरपृष्टैश्चैव संसदि ।
प्रायश्चित्तं न वक्तव्यं जानद्भिरपि जल्पतः ।।१६०।।

अङ्गिराः – कृते निःसंशये पापे न भुञ्जीतानुपस्थितः ।
भुञ्जानो बर्द्धयेत्पापमसत्यं सदसि ब्रुवन् ।।१६१।।

देवलः—कालातिरेके द्विगुणं प्रायश्चित्तं समाचरेत् ।
द्विगुणं राजदण्डञ्च दत्त्वा शुद्धिमवाप्नुयात् ।।१६२।।

अङ्गिराः - आर्त्तानां याचमानानां प्रायश्चित्तानि ये द्विजाः ।
जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः ।।१६३।।

हारीतः - तस्मात्कृच्छ्रमथाप्यर्द्धम्पादं वाऽपि विधानतः ।
ज्ञात्वा बलाबलङ्कालं प्रायश्चित्तम्प्रकल्पयेत् ।।१६४।।
अशीति र्यस्य वर्षाणि बालो वाप्यूनषोडशः ।
प्रायश्चित्ती भवेत्सोऽपि स्त्रियोरोगिण एव च ।।१६५।।

कृच्छ्रांस्तु चतुरः कुर्यादिगोवधे बुद्धिपूर्वके ।
असत्या तदद्वयङ्कार्यन्तदर्द्धम्बालबृद्धयोः ।
तथा स्त्रीशूद्रयोरेव तद्वधे वै न संशयः ।।१६६।।

तथा च - शूद्रस्वामिकसाक्षाद्गोबधे ब्राह्मण-क्षत्रियविशां प्राजापत्यचतुष्टयम्, अज्ञानतः प्राजापत्यद्वयम् । बालबृद्ध-स्त्रीशूद्रस्य तज्ज्ञानतः साक्षाद्वधे प्राजापत्यद्वयम् । अज्ञानतः प्राजापत्यम् । एकस्योभयधर्मवत्त्वे प्राजापत्यार्द्धम् ।

मनुः – अकुर्वन् विहितङ्कर्म निन्दितञ्च समाचरन्।
प्रसङ्गश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः ॥१६७॥

बृहस्पतिः - एकशय्यासनं पङ्क्तिभाण्डपक्वान्नमिश्रणम्।
याजनाध्यापनं योनि तथा च सहभोजनम्॥
नवधा सङ्करः प्रोक्तो न कर्त्तव्योऽधमैस्सह ॥१६८॥

अथ धेनुमूल्यनिर्णयः-

संवर्त्तः - प्राजापत्यव्रताशक्तौ धेनुन्दद्यात्पयस्विनीम्।
धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः ॥१६९॥
धेनुः पञ्चभिराढ्यानां मध्यानां त्रिपुराणकी।
कार्षापणैकमूल्यं हि दरिद्राणां प्रकीर्त्तितम्॥१७०॥

कार्षापणाः षोडश पणा इति।

कात्यायनः - द्वात्रिंशत्पणिका गावो बृषभः षट्पुराणकः।
वत्सः पौराणिको मतः ॥१७१॥

स्मृतिः - गौः षोडशपणास्तत्र मानवा ह्यतिनिर्द्धनाः ॥१७२॥

पूर्वाह्णकृत्यम् - वाप्य केशनखान् पूर्वं घृतं प्राश्य बर्हिन्निशि।
प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत्॥
व्रतन्निशामुखे ग्राह्यं बहिस्तारकदर्शनात् ॥१७३॥

पराशरः – वपनं नैव नारीणां नानुव्रज्याजपादिकम्।
न गोष्ठे शयनङ्कार्यन्न च दध्यु र्गवाजिनम् ॥१७४॥
सर्वान्केशान्समुद्धृत्य छेदयेदङ्गुलिद्वयम्।
सर्वत्रैव हि नारीणां शिरसो मुण्डनं स्मृतम् ॥१७५॥

पारिजातः—सधवानान्तु नारीणामलङ्कारा‌य सर्वदा।
केशसंवरणम्प्रोक्तं प्रायश्चित्ते द्विजोत्तमैः ॥१७६॥

अथ व्रतनिर्णयः

मनुः - त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम्।
त्र्यह परन्तु नाश्नीयात्प्राजापत्यञ्चरन्द्विजः ॥१७७॥

सायं द्वाविंशति ग्रासाः प्रातःषड्विंशतिस्तथा ।
अयाचिते चतुर्विंशः परञ्चानशनं स्मृतम् ॥१७८॥
कुक्कुटाण्डप्रमाणन्तु यावान् वा प्रविशेन्मुखम् ।
एतद्ग्रासं विजानीयाच्छुद्ध्यर्थङ्कायशोधनम् ॥१७९॥

प्राजापत्यव्रतं षडुपवास-समम् । पयस्विधेनुदानसमानञ्च । पादोनकृच्छ्रमाह शङ्खः—

द्व्यहं सायं द्व्यहं प्रातर्द्व्यहमद्यादयाचितम् ।
द्व्यहं परं चोपवासं पादोनञ्च व्रतञ्चरन् ॥१८०॥

कृच्छ्रार्द्धमाह -

आपस्तम्बः - सायम्प्रातस्तथैवैकं दिनद्वयमयाचितम् ।
दिनद्वयञ्च नाश्नीयात्कृच्छ्रार्द्धमभिधीयते ॥१८१॥

पादकृच्छ्रमाह--

याज्ञवल्क्यः - एकभुक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैकेन पादकृच्छ्रः प्रकीर्त्तितः ॥१८२॥

अथ सान्तपनमाह

ब्राह्मे - प्रथमेऽहनि नाश्नीयाद् गोमूत्राशी ततःपुनः ।
तृतीये गोमयाशी च चतुर्थे क्षीरपो भवेत् ॥१८३॥
पञ्चमे दधि भुक्त्वैव घृतं षष्ठेऽपि चेदथ ।
कुशोदकं सप्तमे तु कृच्छ्रः सान्तपनोविधिः ॥१८४॥

तदशक्तौ धेनुद्वयम् ।

पञ्चगव्यमाह--

गोशकृद्द्विगुणं मूत्रं दुग्धन्दद्याच्चतुर्गुणम् ।
घृतञ्चाष्टगुणम्प्रोक्तम्पञ्चगव्ये तथा दधि ॥१८५॥

चान्द्रायणमाह--

मनुः-- त्रींस्त्रीन्पिण्डान् समश्नीयान्नियतात्मा दृढव्रतः ।
हविष्यान्नस्य वै मासमृषिचान्द्रायणं स्मृतम् ।।१८६।।

तदशक्तौ धेनुचतुष्टयम् । तथा दिवा विलंघ्य रात्रौ सार्द्धप्रहराभ्यन्तरे परिमितभोजनरूपं नक्तव्रतम् । तदशक्तेरुपमाषकन्दं सेव्यम् ।

वीरासनमाह--

मनुः – उपपातकसंयुक्तो गोघ्नो मासं यवान्पिबेत् ।
कृतवापो वसेद्गोष्ठे चर्मणा तेन संवृतः ।।१८७।।
चतुर्थकालमश्नीयादक्षारलवणं मितम् ।
गोमूत्रेण चरेत्स्नानं द्वौ मासौ नियतेन्द्रियः ।।१८८।।
दिवानुगच्छेत् ता गास्तु तिष्ठन्नूर्ध्वं रजः पिबेत् ।
शुश्रूषित्वा नमस्कृत्य रात्रौ वीरासनं वसेत् ।।१८९।।
उत्थितस्तु दिवा तिष्ठेदुपविष्टस्तथा निशि ।
एतद्वीरासनन्नाम महापातकनाशनम् ।।१९०।।
तिष्ठन्तीष्वनुतिष्ठेत्तु प्रव्रजन्तीष्वनुव्रजेत् ।
आसीनासु तथासीनो नियतो वीतमत्सरः ।।१९१।।
आतुरामभिशस्तां वा चोरव्याघ्रादिभिर्भयैः ।
पतितां पङ्कलग्नां वा सर्वपापैर्विमोचयेत् ।।१९२।।
ऊष्णे वर्षति शीते वा मारुते वाति वा भृशम् ।
न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः ।।१९३।।
आत्मनो यदि वाऽन्येषां गृहे क्षेत्रेऽथवा खले ।
भक्षयन्ती न कथयेत्पिबन्तञ्चैव वत्सकम् ।।१९४।।
अनेन विधिना यस्तु गोघ्नो गामनुगच्छति ।
स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति ।।१९५।।
वृषभैकादशा गास्तु दद्यात्सुचरितव्रतः ।
अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत् ।।१९६।।

अत्र 'गोमूत्रेण यवागूकृतमिति' गोतमसूत्रात्, गोमूत्रेण मासं यावकपाने प्राजापत्यद्वयम्। मासद्वयं चतुर्थकाले भोजने त्रिशतोपवासैः कृच्छ्रदशकम्। त्रिशता नक्ताशनैः कृच्छ्रपञ्चकं, सङ्कलय्य मिलित्वा सप्तदश प्राजापत्यानि भवन्ति। तदशक्तौ सप्तदशधेनूनां तन्मूल्यानां वा दानम्। इदन्तु ब्रह्मण-स्वामिक-चतुर्हायणादिक ज्ञानकृतसाक्षाद्गोवधे प्रायश्चित्तम्बोध्यम् ॥१९७॥

षाण्मासिकव्रतमाह--

देवलः – षण्मासास्तु चर्मणा परिवृतो गोग्रासाहारो गोव्रते यवाशी गोभिरेव सञ्चरन् विप्रमुच्यते। गोप्रहारी गोग्रासकर्त्ता। तेनात्र षाण्मासिकव्रतं द्वादश प्राजापत्यानि। तदशक्तौ द्वादश-धेनूनान्तन्मूल्यानां वा दानम्। इदन्तु क्षत्रियस्वामिक चतुर्हाय-णादिक-ज्ञानकृतसाक्षाद्गोबधे प्रायश्चित्त ज्ञेयम् ॥१९८॥

मासव्रतमाह--

याज्ञवल्क्यः – पञ्चगव्यम्पिबेद्गोघ्नो मासमासीत संयतः।
गोष्ठे वसेद् गोऽनुगामी गोप्रदानेन शुद्ध्यति ॥१९९॥

गोमतीञ्च जलपन्निति शातातपेनाधिकमुक्तम्। तेन चत्वारि प्राजापत्यानि। तदशक्तौ चतुर्ण्णान्धेनूनां तन्मूल्यानां वा दानम्। इदन्तु अज्ञानकृतवैश्यस्वामिकगोवधे प्रायश्चित्तम्, ज्ञानकृते द्वैगुण्यम् ॥२००॥

शूद्रस्वामिक-ज्ञानतो गोवधे--

विश्वामित्रः - कृच्छ्रांस्तु चतुरः कुर्याद् गोवधे बुद्धिपूर्वके।
अमत्या तु द्वयङ्कुर्यात्तदर्द्धम्बालवृद्धयोः॥
तथास्त्रीशूद्रयोरेवमेतदेव न संशयः ॥२०१॥

अत्र चत्वारि प्राजापत्यानि, चतस्रो धेनवः। अज्ञाने तु धेनुद्वयम्। स्त्रीबालवृद्धानामर्द्धम्। एकस्योभयधर्मवत्त्वे पाद इति सिद्धान्तः ॥२०२॥

अथ गर्भिण्यादिवधे-

बृहस्पतिः - गर्भिणीङ्कपिलां दोग्ध्रीं कामधेनुञ्च सुव्रताम् ।
दण्डादिना घातयित्वा द्विगुणङ्गोव्रतञ्चरेत् ॥२०२॥

अतिवृद्धादिवधे अर्द्धप्रायश्चित्तम् ।

बृहस्पतिः - अतिबृद्धामतिकृशामतिबालाञ्च रोगिणीम् ।
हत्वा पूर्वं विधानेन चरेदर्द्धं व्रत द्विजः ॥२०३॥

पूर्वविधानेन मन्वाद्युक्तत्रैमासिकादिना । अतिबाला द्विवर्षीया ।

अङ्गिराः - वर्षमात्रा तु बाला स्यादतिबाला द्विवार्षिकी ।
अतः परन्तु सा गौः स्यात्तरुणी दन्तजन्मनि ॥२०४॥

एकहायन्यादिवधे प्रायश्चित्तमाह —

प्रचेताः—एकवर्षे गवि हते कृच्छ्रपादो विधीयते ।
अबुद्धिपूर्वं पुंसः स्याद् द्विपादस्तु द्विहायनैः ॥
त्रिहायने त्रिपादःस्यात्प्राजापत्यमतःपरम् ॥२०५॥

अतः परं, चतुर्हायनादावित्यर्थः ।

एकप्रयत्नेन निष्पन्ने बहूनाङ्गवां वधे-

संवर्त्तः-विपन्नानाम्बहूनाञ्च बन्धने बोधनेऽपि वा ।
भिषङ्मिथ्योपचारेऽपि द्विगुणङ्गोव्रतञ्चरेत् ॥२०६॥

बहूनामेकाधिकानामिति स्मार्त्ताः । अपिशब्दाद् गृहदाहपरिग्रहः । वहुभिरेकस्या गोर्हनने--

संवर्त्तः - एका चेद्वहुभिः कापि दैवाद्व्यापादिता भवेत् ।
पादं पादन्तु हत्यायाश्चरेयुस्ते पृथक् पृथक् ॥२०७॥

एका चेदित्युपलक्षणम् । द्वयो र्बहूनां हनने प्रतिपुरुषं पादद्वयं त्रयादिकं कर्त्तव्यम् । इदमज्ञानतः । ज्ञानतो द्वैगुण्यम् ॥२०८॥

पञ्चविधकर्त्तृत्वनिर्णयः

चेतनान्तरव्यापारव्यवधानेन वधनिष्पादकः कर्त्ता। योऽप्रवृत्तं पुरुषं वधार्थं वेतनादिना प्रवर्त्तयति स प्रयोजकः। 'एनं हन्मीति' वाक्ये ऽनुमतिदाता निषेधक्षमोऽपि मौनावलम्बनोनुमन्ता। वधस्य पलायनादि-विरोधकेऽनुग्राहकः। उद्देश्यत्वे सति हन्तुर्म्मन्युरुत्पादको निमित्ती। एवं मुन्यन्तरोक्तानि लघुप्रायश्चित्तानि प्रयोजकानुग्राहकानुमन्तृ निमित्तविषयाणि ॥२०९॥

अथ रोधादिनिमित्तगोवधप्रायश्चित्तम्

अङ्गिराः—पादञ्चरेद्रोधवधे द्वौ पादौ बन्धने चरेत्।
योजने पादहीनंस्याच्चरेत्सर्वन्निपातने ॥२१०॥

अथ प्राजापत्यस्यापवादः

पराशरः—रोधने तु चरेत्पादं बन्धने चार्द्धमेव च।
योजने पादहीनं स्यात्प्राजापत्यं निपातने ॥२११॥

बृहस्पतिः—पादञ्चरेद्रोधबधे कृच्छ्रार्द्धम्बन्धने तथा।
अतिवाहे तु पादोनङ्कृच्छ्रमज्ञानताड़ने ॥२१२॥

इत्याभ्यां सहैकवाक्यत्वात्।

चान्द्रायणव्रतम्

पराशरः-एकैकं ह्रासयेत्पिण्डं कृष्णे शुक्ले च बर्द्धयेत्।
उपस्पृशस्त्रिषवणमेतच्चान्द्रायणं स्मृतम् ॥२१३॥

तदशक्तौ अष्टधेनूनां वा दानम्।

अथास्थिभङ्गप्रायश्चित्तम्

यमः - शृङ्गभङ्गास्थिभङ्गे च कटिभङ्गे तथैव च।
यदि जीवति षण्मासान् प्रायश्चित्तं न विद्यते ॥२१४॥

अस्यार्थः—षण्मासोपरि मरणे तन्निमित्तकप्रायश्चित्तं न विद्यत इति।

गोभिलः - मुष्कमोषकरो विप्रो गोवधस्य व्रतञ्चरेत्।
प्रयोजकस्तु कुर्वीत व्रतस्यार्द्धं विशुद्धये ॥२१५॥

मुष्कमोषकरो बीजकोषनाशकः। अस्थिभङ्गादिकरणे षण्मासाभ्यन्तरे गोर्मरणे स्वामिभेदेन एकहायन्यादिक्रमेण प्रायश्चित्ताचरणम्। षण्मासोपरि जीवने मरणे वा प्राजापत्यं वाचनिकम्। तत्र धेनुरेका। एवमण्डनाशकरणे प्रायश्चित्तम्। प्रयोजकस्य तदर्द्धमिति ॥२१६॥

अथापालननिमित्तकगोबधप्रायश्चित्तम्

पराशरः—शीतानिलहता चैव उद्बन्धनमृतापि वा।
शून्यागाराद्युपेक्षायां प्रजापत्यं विनिर्द्दिशेत् ॥२१७॥
अपालनाद्विनश्येत्तु गोश्चरन्ती कथञ्चन।
जलौघपल्लवे मग्ना नागविद्युद्धताऽपि वा ॥२१८॥
श्वभ्रे वा पतिताकस्माच्छ्वापदैर्वाऽपि भक्षिता।
प्राजापत्यञ्चरेत्कृच्छ्रङ्गोस्वामी व्रतमुत्तमम् ॥२१९॥
सशिखं वपनङ्कार्य्यं त्रिसन्ध्यमवगाहनम्।
शृङ्गैर्वाऽपि खुरैर्युक्तं लाङ्गूलश्रवणादिभिः ॥२२०॥
आर्द्रमेव हि तच्चर्म परिधाय स गां व्रजेत्।
तासाम्मध्ये वसेद्रात्रौ दिवा ताभिः समं व्रजेत् ॥२२१॥
ब्राह्मणस्य विशेषेण तथा राजन्य-वैश्ययोः।
प्रायश्चित्ते ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम् ॥
अनडुत्सहिताङ्गाञ्च दद्याद्विप्राय दक्षिणाम् ॥२२२॥

अत्रेतिकर्त्तव्यता सहितप्राजापत्याकरणे धेनुद्वयदानञ्च करणीयम्। बृषभो गौश्चदक्षिणा। एषा च शूद्रस्वामिकेतरविषया। एतच्च पालकासमर्पणे। समर्पणे तु पालकस्यैव दोषो न तु स्वामिन इति। ॥२२३॥

बृहस्पतिः—अनागतस्य चानेता आगतस्यापि रक्षिता।
रात्रावपि यदाऽन्योस्ति तदा स्वामी न दोषभाक् ॥२२४॥

दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे ।
योगक्षेमोऽन्था चेत्तु पालो वक्तव्यतामियात् ॥२२५॥

एकहायन्यादिवधे--

यमः—काण्डारेऽप्यथवा दुर्गे गृहदाहे वनेषु च ।
यदि तत्र विपत्तिःस्यात्पाद एको विधीयते ॥२२६॥

शूद्रादिना मृते प्राजापत्यपादः करणीय इति । म्लेच्छस्थाने गोर्विक्रये विनिमये वा चान्द्रायणम् । यदि तेन वधः क्रियते तदा ज्ञानकृतवधप्रायश्चित्तम् ॥२२७॥

विक्रये गोर्विनिमये दत्ता गोमांसखादके ।
व्रतञ्चान्द्रायणङ् कुर्यादवधे साक्षाद्वधी भवेत् ॥२२८॥

चान्द्रायणं, शिशुचान्द्रायणम्, पापस्य लघुत्वादिति ।

शिशुचान्द्रायणमाह--

चतुरः प्रातरश्नीयात् पिण्डान्विप्रसमाहितः ।
चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं स्मृतम् ॥२२९॥

तत्र पादोनधेनुचतुष्टयम् ।

गोवधापवादः

संवर्त्तः—यन्त्रणे गोचिकित्सायां गूढगर्भविमोचने ।
यत्ने कृते विपत्तिःस्यात्प्रायश्चित्तं न विद्यते ॥२३०॥
औषधं स्नेहमाहारं ददद्गोब्राह्मणेषु च ।
प्राणिनां प्राणवृत्त्यर्थं प्रायश्चित्तं न विद्यते ॥२३१॥
दाहच्छेद-शिरोभेद-प्रयत्नैरुपकुर्वताम् ।
द्विजानाङ्गोहितार्थं बा प्रायश्चित्तं न विद्यते ॥२३२॥
देवद्रोण्यां विहारेषु कूपेष्वायतनेषु च ।
एषु गोषु विपन्नासु प्रायश्चित्तं न विद्यते ॥२३३॥

अत्र कूपायतनकर्त्तुर्द्दोषाभावः। ननु स्वामिन इति, तस्यापालनकृत-प्रायश्चित्तम्भवत्येव।

औषधं लवणञ्चैव स्नेहं पिण्याकमेव च।
अतिरिक्तं न दातव्यं काले स्वल्पेन दापयेत् ॥२३४॥
अतिरिक्ते विपन्नानाङ् कृच्छ्रादो विधीयते।
औषधे न तु दोषोऽस्ति स्वेच्छया पिबते यदि।
अन्यथा दीयमाने तु प्रायश्चित्ती न संशयः ॥२३५॥

प्रायश्चित्तापवादः

अङ्गिराः—अन्यत्राङ्कण - लक्षमभ्यां वाहनिर्मोचने कृते।
अरक्षिते तु कूपादौ मृते व्याघ्रादिभक्षिते ॥
व्रतार्द्धमाचरेत्स्वामी रक्षितो नास्ति दूषणम् ॥२३६॥

स्मृतिः—यदा चरेत्तु विपिने निर्भये वृकवर्ज्जिते।
आगत्य वृक-व्याघ्राद्यैः खादितो नास्ति दूषणम् ॥२३७॥

इति महामहोपाध्याय श्रीउमापतिकृता स्मृतिदीपिका समाप्ता ॥

म० म० उमापतिविरचितः

शुद्धिनिर्णयः

तार्किकशिरोमणि श्री श्रीकृष्णठक्कुरकृत-टिप्पणीसहितः

सम्पादकः

डा० शशिनाथ झा

व्याख्याता,

व्याकरण-भाषाविज्ञान-विभागः,

का० सिं० द० संस्कृत विश्वविद्यालयः, दरभङ्गा

कामेश्वरसिंह दरभङ्गा संस्कृत विश्वविद्यालयः

शुद्धिनर्णयस्य विषयसूची

प्राक्कथनम् ---

१ चातुर्वर्ण्याशौचम्

२ सपिण्डादिलक्षणम्

३ अशौचसंकरः

४ विदेशस्थाशौचम्

५ बालाद्यशौचम्

६ स्त्र्यशौचम्

७ गर्भस्रावाशौचम्

८ मृत्युविशेषाशौचम्

९ सपिण्डाद्यशौचम्

१० निर्हाणाद्यशौचम्

११ अथाधिकारिणः

१२ अनधिकारिणः

१३ उदकानर्हाः

१४ संन्यासिनाम् एकोद्दिष्टविचारः

टिप्पणीस्था मुख्यविषयाः

	विषयाः	टिप्पणी संख्या
१	सापिण्ड्यविचारः	२
२	दाहप्रकारः, पर्णनरदाहः	५४
३	स्नानशुद्धिः	५६
४	त्रयोदश पुत्राः	६२
५	एकोद्दिष्टनियमः	८२
६	अशौचान्तमुण्डने प्रमाणम्	८७

★★★

प्राक्कथनम्

आशौच-निर्णयापरनामकोऽयं शुद्धिनिर्णयः चिराद् विद्वद्भिरादृतः । अत्र वर्णाश्रमधर्मानुसारं जनन-मरणाशौचं, तच्छुद्धिश्च साररूपेण निरूपितम् । शास्त्रे हि सकलदेशाचारानुसारं व्यवस्था दृश्यते । तत्र स्वदेशीया ग्राह्या, अन्यदेशीया च त्याज्या इत्येव सर्वसम्मता। ग्रन्थेऽस्मिन् शास्त्रानुकूलापि व्यवस्था क्वचिन्मैथिलव्यवहारविरुद्धाऽवलोक्यते । अतएव तत्र टिप्पणीकारेण समाहितम् । एतेन ग्रन्थस्यास्य उपयोगिता सर्वोपयोगिनी सञ्जाता ।

क्वाशौचप्राप्तिः, क्वाप्राप्तिः, कियत्कालेन केन विधिना च तच्छुद्धिः इति विषये ग्रन्थोयं सत्यमेव निर्णयभूतः । अत्र नानास्मृतिवचन-जालं विहाय सारतया निर्णयः समुपन्यस्तः । तद्विषये नानाविषया अपि संक्षिप्तरूपेण उपन्यस्ताः ।

एतद्ग्रन्थस्य बहवो मातृकाः समुपलभ्यन्ते । का० सिं द० संस्कृतविश्वविद्यालयीय-पुस्तकालयेऽपि चतस्रो मातृकाः सन्ति । एतस्य सकृदेवैकं संस्करणं यूनियन-यन्त्रालये, दरभङ्गायां १८८६ ई० वर्षे तर्कविच्छ्री श्रीकृष्णठक्कुर शर्मणां सम्पादकत्वे जातम् ।

एतद्ग्रन्थप्रणता म० म० उमापतिशर्मा स्वपरिचयं नैव प्रस्तौति । मिथिलायामनेके उमापतिनामका विद्वांसः प्रादुर्भूताः । तेषु द्वौ परमप्रसिद्धौ—

(१) 'दहिहरय—अमरावती'-वंशोद्भवः पारिजातहरणनाटक पदार्थीयदिव्यचक्षुः[1]-प्रभृतिग्रन्थकर्ता (१६२५ ई०) कोइलखग्रामाभिजनः ।

(२) 'पवौली-बढ़िआम'-वंशोद्भवः स्मृतिदीपिका प्रायश्चित्तनिर्णय-सारसंग्रह प्रभृतिग्रन्थकर्ता (१७५०-१८३० ई०) मङ्गलवनीग्रामाभिजनो म०म० गोकुलनाथोपाध्यायसुत म०म० रघुनाथोपाध्यायस्य दौहित्रः । अयं हि कवे र्नन्दीपतेः (कृष्णकेलिमालानाटिकाकर्तुः) भ्रातुष्पुत्र आसीत् ।

---

१ द्रष्टव्यः—'उमापति'--डा० रामदेव झा- मैथिली अकादमी, पटना ।

परन्तु नैतयोः कश्चिदस्य शुद्धिनिर्णयस्य प्रणेता। यतो हि का० सिं० दरभङ्गासंस्कृत विश्वविद्यालयीय-हस्तलिखितग्रन्थागारे २४६ (८) संख्यक शुद्धिनिर्णयस्यान्तेऽयमुमापतिः करमहाकुलसंभूत उक्तः—

"इति करमहाकुलसंभव श्रीमदुमापतिविरचितः शुद्धिनिर्णयः सम्पूर्णतामगादिति"।

साम्प्रतं करमहावंशोद्भवस्य उमापतेः केवलमयमेव ग्रन्थ उपलभ्यते।

प्रायश्चित्तनिर्णये पवौलिवंशोद्भवरूपेण उमापतिः स्वपरिचयं ददाति। किञ्च अस्य, सारसंग्रहस्य, स्मृतिदीपिकायाश्च मङ्गलाचरणं समानाकारकं विलोक्यते। तथाहि—

१ प्रणम्य सच्चिदानन्दं श्रीमदुमापति शर्मणा।
नाना निबन्धमालोक्य प्रायश्चित्तं निरूप्यते॥
२ प्रणम्य सच्चिदानन्दं श्री उमापतिशर्मणा।
नानानिबन्धमाश्रित्य क्रियते स्मृतिदीपिका॥
३ प्रणम्य परमेशानं श्रीमदुमापतिशर्मणा।
नानानिबन्धमालोक्य क्रियते सारसंग्रहः॥

४ इति महोपाध्याय पगौलि सं० श्रीमदुमापति विरचितः प्रायश्चित्तनिर्णयः सम्पूर्णः।

(दरभङ्गा सं० विश्वविद्यालय-मातृकाः)।

एषु सारसंग्रहः प० श्री यागेश्वर झा शर्मणा सम्पाद्यमानो ज्ञातः। प्रायश्चित्तनिर्णयो म० म० कोलेश्वरकृत-शुद्धिदीपिकाया अन्ते प्रकाशितोऽस्ति विश्वविद्यालयेनैव।

पवौलिवंशीयोमापतेः पिता गरीबनाथः, पुत्रश्च म० म० कन्हाइ झा। कन्हाइशर्मणो दौहित्रो बेहटगामवास्तव्य-मदनमोहनसुतो नरसिंहः, मङ्गलवनीवास्तव्य-दुःखमोचनशर्मसुत कुइशर्मा। कुइशर्मणः पुत्रो राजेश्वरीदत्त-कपिलेश्वरीदत्तौ स्तः।

शुद्धिनिर्णयकारस्य करमहावंशीयस्य उमापते विषये पञ्जीकारः श्रीहरिनन्दन झा महोदयः स्पष्टीकृतवान्। तथाहि-करमहाकुलस्य "अनलपुर" शाखायां श्रोत्रियवंशे म०म० उमापतिरयं जन्म लेभे।

तद्वंशक्रमः -

रघुनन्दनप्रसिद्धो नन्दः

वछाइकः | सदानन्द | शुभङ्करः

शुभङ्करः → म० म० उमापतिः | (कन्या)

म० म० उमापतिः → छबनू प्रसिद्धो विष्णुदेवः | चननू प्रसिद्धो रामदेवः

(कन्या) → सरसकवि-कुलपतिः

छबनू प्रसिद्धो विष्णुदेवः → रुद्रदेवः | खगदेवः | काला | लाला | भैरवः

राजकीय-चन्द्रधारिसंग्रहालये दरभङ्गायां हस्तलिखित एको ग्रन्थ उमापतिशर्मणा लिपीकृतो विद्यते। तत्र एवं निर्देश उपलभ्यते:—

ग्रन्थाङ्कः—३६--दायभाग-स्मृतितत्त्वम्--"इति श्रीरघुनन्दनभट्टाचार्य-विरचित-दायतत्त्वं समाप्तम्। शाके १६९९ बंगदेशतत्प्रान्तर्गत-दिनाजपुरग्रामे श्रीउमापति शर्मणा लिखितमिदं स्वार्थम्"।

शाके १६९९ (१७७७ ई०) वर्षे मङ्गलवनीवास्तव्यस्योमापतेः समयः। तेन निश्चीयते यत् तस्यैव लिपिः स्यादिति।

शुद्धिनिर्णयकारस्य करमहावंशोद्भवस्य उमापतेः समयविषये एतदेव कथयितुं शक्यते यत् शुद्धिनिर्णयस्य दरभङ्गा सं० विश्वविद्यालयीय-हस्तलिखितग्रन्थ सं० १००३ पुस्तके लिपिकालः शाके १६८३ (१७६१ ई०) उल्लिखितः। ततः पूर्वोऽयं बभूव। अर्थात् १७०० ई० तः १७७० ई० एतस्य समयः स्यादिति मन्ये।

शुद्धिनिर्णयस्य टिप्पणीकारः सर्वसीमाग्रामाभिजनः तार्किकशिरोमणिः श्रीकृष्णठक्कुरो विविधग्रन्थप्रणेतृत्वेन प्रसिद्धः । तद्वंशक्रमः - कविश्यामनाथः — तन्त्रविन्महेश्वरः—तार्किकशिरोमणिः श्रीकृष्णशिः - चन्द्रकान्तः— ईशनाथः । ईशनाथः सम्प्रति दरभङ्गास्थ--चन्द्रधारिमहाविद्यालये आङ्गलाध्यापकोऽस्ति । श्रीकृष्णस्य समयः १८६०--१९३० ई० आसीत् ।

उपयोगितया ग्रन्थोऽयं सुसम्पाद्य विदुषां पुरतः समुपस्थाप्यते । मन्ये, एतेन धर्मं जिज्ञासूनामुपकारः स्यात्, स्याच्च मनीषिणां परितोष इति निवेदयति ।

श्रीशशिनाथ झा शर्मा
१-२-१९८२
स्नातकोत्तरव्याकरणभाषाविज्ञान विभागः
का० सिं० द० संस्कृत विश्वविद्यालयः, दरभङ्गा

म० म० उमापतिकृतः

शुद्धिनिर्णयः

आविर्भाव-तिरोभावौ सृष्टि-प्रलयसंज्ञकौ ।
यदीयौ भवतो नित्यं वन्दे तद् ब्रह्म शाश्वतम् ॥१॥
अथ सालसबुद्धीनां झटिति प्रतिपत्तये ।
नाना-निबन्धसिद्धोऽसौ लिख्यते शुद्धिनिर्णयः ॥२॥

१--चातुर्वर्ण्याशौचम्

सपिण्डे ब्राह्मणे मृते ब्राह्मणो दशरात्रेण शुद्ध्यति । क्षत्रिये सपिण्डे मृते क्षत्रियो द्वादशाहेन, वैश्ये सपिण्डे मृते वैश्यः पञ्चदशाहेन, शूद्रे सपिण्डे मृते शूद्रो मासेन शुद्ध्यति ।

[१]चतुर्णामप्येषां सकुल्ये मृते त्रिरात्रेण, कुलजे मृते पक्षिण्या, गोत्रजे मृते स्नानमात्रेण शुद्ध्यति ।

अपकृष्टवर्णेन उत्कृष्टवर्णस्त्रीषु जाताः सङ्कराः, तेषां शूद्रवद् व्यवहारः ।

सपिण्डादि-जन्मन्यपि चतुर्णां मरणवद् अशौचम् ।

पूर्वापर-दिनद्वय-सहिता रात्रिः, तादृश-रात्रिद्वयसहितं दिनं वा पक्षिणी ।

---

१ चतुर्णां ब्रह्मणादीनाम् ।

२—सपिण्डादिलक्षणम्

सपिण्डाः[२] सप्तपुरुषावधयः । स्ववंश्याः सप्तपुरुषाऽनन्तरं दशपुरुषं यावत् सकुल्याः । तदूर्ध्वं जन्मनाम्नो ज्ञाने कुलजाः । दशपुरुषानन्तरं जन्मनाम्नोरज्ञाने अस्मत्कुलजा इत्येवम् आकारेण ज्ञानगोचरा गोत्रजाः ।

कुमारीणां पितृसपिण्डम् । अकुमारीणां पतिसपिण्डम्, सकुल्यत्वादिकम् अपि एवम् ।

३—अशौचसङ्करः

दशाहाशौचे[३] पञ्चमदिनपर्यन्तं द्वितीयं सजातीयं दशाहाशौचम् आपतति तदा पूर्वाशौच-व्यपगनेन शुद्धिः । तदनन्तरं[४] नवमदिन-पर्यन्तं यदि सजातीयं द्वितीयम् आपतति तदा द्वितीयाशौच-व्यपगमेन शुद्धिः । दशमदिने सजातीयाशौच-निपाते तद्दिनानन्तर-दिनद्वयेन शुद्धिः, दशमदिनरात्रिशेषे अरुणोदयवेलायां सम्पूर्णाऽशौच नपाते सूर्योदयानन्तरं त्रिरात्रेण शुद्धिरिति ।

एवं[५] क्षत्रियादीनां त्रयाणां बोद्धव्यम् ।

---

२ अत्राय भावः—बीजिनं पुरुषमारभ्य सप्तमपुरुषमभिव्याप्य सर्वेषां सन्तानिनां सन्तानानां च सापिण्ड्यमिति एकस्यापि सप्तमाधिकत्वे तेन समं सप्तमान्तर्गतस्यापि सापिण्ड्यं निवर्तते संयोगवद् उभयनिष्ठत्वादिति ।

३ दशाहाशौचे, सम्पूर्णाऽशौचमित्यर्थः । तेन क्षत्रियादीनां द्वादशाहाशौचानां परिग्रहः ।

४ तदनन्तरं—पञ्चमदिनानन्तरम् ।

५ सम्पूर्ण-स्वस्वाशौचपूर्वार्द्धे दिने समानदिनव्यापकाशौचान्तरोपनिपाते तदा पूर्वाऽशौचव्यपगमेन, अग्रिमार्द्धे अग्रिमाशौचव्यपगमेन, अशौचान्तदिने अशौचान्तरोपनिपाते तद्दिनानन्तर-दिनद्वयेन, अशौचान्तदिन-शेषप्रभाते अशौचान्तरोपनिपाते अधिकेन दिनत्रयेण शुद्धिरिति ।

त्र्यहाशौचे समकालिकाशौचान्तरोप-निपाते द्वितीयव्यपगमेन शुद्धिः ।

जनने मरणाशौचनिपाते अल्पदिनव्यापकेनापि मरणाशौचेन उपशुद्धिः ।

स्त्रीणां यत् प्रसवनिमित्तकं प्रातिस्विकम् अशौचान्तदिने न बाध्यते । तेनस्त्रीणां पतिमरणे पुत्रजन्मनि विंशदिनेभ्य ऊर्ध्वं, कन्याजन्मनि मासादूर्ध्वं श्राद्धादि-कर्माणि दृष्टार्थपाकादौ चाधिकार इति ।

४—विदेशस्थाशौचम्

अनतीताऽशौचकाले यदि विदेशस्थ-मरणं श्रूयते तदा यावदवशिष्टम् अशौचकालस्य तावदशौचम् ।

सम्पूर्णाऽशौचकाले अतीते षण्मासाभ्यन्तरे सपिण्डमरणं श्रूयते तदा त्रिरात्रेण शुद्धिः । नवममासपर्यन्तं पक्षिणो, तदूर्ध्वं[६] वर्षं यावद् एकाहोरात्रं, वर्षानन्तरं स्नानोदकदानमात्रम् ।

त्र्यहाशौचे व्यतीते सर्वत्र स्नानम् उदकदानमात्रम् । जननाशौचकाले व्यतीते अशौचाभाव इति ।

एकाहेन यत्रत्या वार्ता न श्रूयते स विदेश[७] इति रत्नाकरः । षष्टियोजनानन्तरदेशो देशान्तरम् । षष्टियोजनाभ्यन्तरेऽपि भाषाभेद-गिरि-महानदी[८] व्यवधानानि भवन्ति, तदपि देशान्तरम् । तत्र मृते सद्यः शौचम् ।

---

६ तदूर्ध्वं — नवममासादूर्ध्वम् ।

७ ग्रामान्तरे क्रोशाभ्यन्तरेऽपि विदेशत्वव्यवहार इति ।

८ महानद्यो गङ्गाद्याः ।

५---बालाद्यशौचम्

षण्मासाभ्यन्तरे बालमरणे सर्ववर्णानां सद्यः शौचम् । ब्राह्मणानां सप्तममासादारभ्य द्विवर्षं यावद् अहोराम, आव्रतादेशात्[९] त्रिरात्रम्, ततः[१०]स्वजात्युक्तम् ।

क्षत्रियाणां सप्तममासादारभ्य द्विवर्षं यावत् त्र्यहं, ततस्तृतीयवर्षादारभ्य षष्ठवर्षं यावत् षडहं, तदुपरि[११]स्वजात्युक्तमशौचम् ।

वैश्यानां सप्तममासादारभ्य द्विवर्षं यावत् त्र्यहं, तदुपरि पञ्च वर्षं यावन्नवाहं, [१२]तदुपरि[१३]स्वजात्युक्तमशौचम् ।

शूद्राणां सप्तममासादारभ्य द्विवर्षं यावत् पञ्चाहं, तदुपरि[१४] षोडशवर्षं यावद् अविवाहिते मृते द्वादशाहं, विवाहिते अष्टमवर्षादेव[१५]उपरि मृते मासमशौचम् ।

येषां शूद्राणां द्विजोच्छिष्टभोजनं द्विजशुश्रूषा मासि मासि मुण्डनं, तेषां सप्तममासादारभ्य पञ्चमवर्षं यावद् बालमृते त्रिरात्रं, षोडशवर्षाणि यावद् अविवाहिते मृते द्वादशाहं[१६], तदुपरि [१७]स्वजात्युक्तमशौचम् ।

९ आव्रतादेशात् । तथा च तृतीयवर्षादारभ्य षड्वर्षसमाप्ति यावत् त्रिरात्रमिति भावः ।

१० ततः-षड्वर्षादूर्ध्वम् ।

११ स्वजात्युक्तं--द्वादशाहम् ।

१२ तदुपरि=पञ्चवर्षोपरि ।

१३ स्वजात्युक्तं=पञ्चदशाहम् ।

१४ तदुपरि=द्विवर्षोपरि ।

१५ एतेन द्विवर्षानन्तरम् अष्टमवर्षं यावद् अविवाहिते मृते द्वादशाहं, विवाहिते मृते सम्पूर्णाशौचमित्यवगम्यते ।

१६ तदुपरि=षोडशवर्षोपरि ।

१७ स्वजात्युक्तं=मासमशौचम् ।

प्रसूतीनां सर्वासामेव दशाहाभ्यन्तरे बालमरणे यावद् दशाहं पूर्यते तावदशौचं संभवति ।

सर्ववर्णानाम् असम्पूर्णद्विवर्षो बालो भूमौ निखननीयः । अग्निदानं तस्य न कर्त्तव्यम् । यदि तु प्रमादादिना तस्य दाहः क्रियते तदा ब्राह्मणानां त्रिरात्रम्, क्षत्रियाणाम् एकादशाहं, वैश्यानां द्वादशाहं, शूद्राणां विंशतिरात्रमशौच भवति ।

६—स्त्र्यशौचम्

सर्ववर्णानां द्विवर्षं यावत् कन्यामरणे सद्यः शौचम् । तदनन्तरं[१८] विवाहपर्यन्तम् एकाहोरात्रम् । स्वामिकुले सम्पूर्णाशौचम् ।

यदि तु मया तुभ्यम् एषा प्रदत्ता इति वाग्दानं क्रियते तत्र मृतायां तस्यां विवाहपर्यन्त पितृ-पतिपक्षयो द्वयोरपि त्रिरात्रमिति विशेषः ।

विवाहिता स्त्री यदि पितृगृहे[१९] प्रसूयते म्रियते वा तदा मातापित्रोस्त्रिरात्रम् अशौचम् ।

एकाश्रमवासिनां भ्रातृ-वैमात्रय-पितृव्यपुत्राणां तत्पुत्राणां पितृव्यस्य च एकरात्रम्[२०] । पितु भिन्नाश्रमवासिनां पुत्रादी-

---

१८ तदनन्तरम् = द्विवर्षानन्तरम् ।

१९ 'पितृगृहे' इति उपलक्षणम्, अन्यत्रापि प्रसूयते म्रियते वा मातापित्रोः शास्त्रान्तरप्राप्त—त्रिरात्राशौचव्यवहारात् ।

२० 'एकरात्रम्' इति हेयम्, एतेषां शास्त्रान्तरसिद्ध-त्रिरात्राशौचस्य मैथिलव्यवहारसिद्धत्वात् ।

नाम्[२१] अशौचं न[२२]भवति ।

पितुरभावे मातृगृहे दुहितुर्मरणे प्रसवे वा मातुस्त्रिरात्रम् एव । मातुरभावे भ्रातृगृहे भगिन्याः प्रसवे मरणे वा [२३]भ्रात्रादीनामेकरात्रम् अशौचं भवति ।

विवाहिता स्त्री यं पाणिग्राहकाद् अन्यम् आश्रयति तस्यां प्रसूतायां मृतायां वा तस्य त्रिरात्रमशौचं भवति । स्वयंग्राहककुलजानाम् अशौचं न भवति ।

यदि पाणिग्राहकेन तस्याः संगमः कृतः तदा तस्याः पाणिग्राहकगोत्रम् एव अवतिष्ठते, स्वयग्राहक-गोत्र न भवति । यदि तस्याः तत्संगमो न कृतः तदा यमेव[२४] आश्रिता तस्यैव[२५] सगोत्रा सा भवति, अशौचं तस्यापि त्र्यहमेव ।

पाणिग्रहणे वृत्ते, असमाप्ते सप्तपद्यश्मारोहणे या बलात्कारेण गृहीता अन्यमाश्रिता, तस्याः स्वामिगोत्रं पाणिग्राहकगोत्रमेव । पाणिग्रहणे वृत्ते असमाप्ते तस्या बलात्कारगृहीताया यावत् प्रसवो न भवति तावदपि पितृगोत्रमेव अवतिष्ठते । प्रसवानन्तरं पौर्विकस्य[२६] भर्त्तुः प्रसवमरणयोः त्रिरात्रमशौजम् ।

अविवाहिता स्त्री यदि रजस्वला भवति तदा तत्पितुः तत्प्रसवमरणजन्यमशौचं न त्यजति ।

---

२१ आदिना भ्रातृ-वैमात्रेय-पितृव्यपुत्र-तत्पुत्र-पितृव्यानां संग्रहः ।

२२ शास्त्रान्तरेण एतेषां भिन्नाश्रमवासिनामपि त्र्यहाशौचं न त्यजतीति मैथिलाः ।

२३ अत्रापि 'एकरात्रम्' इति हेयम्, उक्तयुक्तेः ।

२४ यं = स्वयंग्राहकपुरुषम् ।

२५ तस्यैव = स्वयंग्राहकस्यैव ।

२६ पौर्विकस्य = पूर्वकृतस्य ।

७---गर्भस्रावाशौचम्

मासत्रयाभ्यन्तरे ब्राह्मण्याः त्रिरात्रम्, मासत्रयोपरि षण्मासपर्यन्तं यावत्सु मासेषु अतीतेषु गर्भस्रावो भवति तावन्ति एव दिनानि अशौचं भवति, षण्मासोपरि दशरात्रमशौचं भवति। पतिपुत्रादिसपिण्डानां सद्यः शौचं भवति।

क्षत्रियायास्तु मासत्रयाभ्यन्तरे दिनचतुष्टयं, वैश्यायाः पञ्चाहं, तदुपरि षण्मासं यावद् उभयोरपि अतीतमास-समसंख्यानि दिनानि, तदुपरि द्वादशाहं क्षत्रियायाः, वैश्यायाः पञ्चदशाहम्, शूद्राया मासत्रयं यावद् अष्टाहं, ततः षण्मासं यावद् अतीतमाससमसंख्यानि दिनानि,तदुपरि[२७]मासमशौचं भवति।

अत्र सर्वत्र निर्गुणसपिण्डानाम् एकाहं, यथेच्छाचरणानां च त्र्यहम्

८---मृत्युविशेषाशौचम्

शौचाऽऽचमनाद्यसमर्थस्य वृद्धस्य असाध्यव्याधिगृहीतस्य च पुरुषस्य मरणेच्छयाऽग्निजलादिप्रवेशेन मरणे सपिण्डानां त्रिरात्रमशौचम्। तत्कालेऽग्न्यादिप्रवेशेऽपि अमृतानां पश्चान्मृतानामपि त्रिरात्रमशौचं भवति।

रोगादिना[२८]ये जलाशयेषु आत्मानं घातयन्ति, तेषाम् अग्निदाहादिकं न कर्त्तव्यम्, तन्मरणनिमित्तकम् अशौचमपि न कर्त्तव्यम्।

---

२७ तदुपरि=षण्मासोपरि।

२८ रोगादिनेत्यादिना पुत्रादिशोकपरिग्रहः।

प्रमादेन[२९]अग्निवज्रादिना[३०] मरणे सम्पूर्णमशौचम्, अग्निदाहादिकाश्च क्रियाः कर्त्तव्याः ।

[३१]सम्मर्दहतानां, शस्त्रशून्य-कलहमृतानां, राज्ञा हतानां च सद्यः शौचम् ।

गो-ब्राह्मणार्थे जल-पङ्कादिमग्नानां, संग्रामशस्त्रसंमुखहतानां, मरणान्तिके काम्यकर्मणि प्रयागादौ प्रायश्चित्ते च शस्त्र-जलाग्नि-श्वापदादिभि[३२] र्मृतानां च सद्यः शौचम् । राजाज्ञया हतकस्यापि सद्यः शौचम् ।

ब्राह्मणार्थे गवार्थे च दण्डेन विपन्नानां वन्दीकृतानाम्[३३]एकाहोरात्रम् ।

लगुडादिना[३४]संग्रामे पराहतस्य त्रिरात्रम् ।

यदि[३५]अबहिर्भूतोपसंग्रामाद् मरणं तदा सद्यः शौचम् । बहिर्भूतोपसर्गमृतानां सम्पूर्णाशौचस्य प्रमाणिक-व्यवहारः ।

अत्यन्त-[३६]दुर्भिक्षोपसर्गिकात्यन्तमरणादिपीडायां वा नाशौचम् ।

---

२९ प्रमादेन = अनवधानेन ।

३० वज्रादिनेत्यादिना उदकादिपरिग्रहः ।

३१ संमर्द्दो मुष्टियुद्धम् ।

३२ श्वापदो व्याघ्रादिः ।

३३ वन्दीकृतानां चौरादिगृहीतानाम् ।

३४ लगुडो = दण्डः ।

३५ अबहिर्भूतः = संग्रामभूमिस्थितः ।

३६ उपसर्गः = उत्पातः ।

६ – सपिण्डाद्यशौचम्

सपिण्डमरणे दशाहम् । सकुल्यमरणे त्रिरात्रम् । ज्ञातिमरणे पक्षिणी । गोत्रजे मृते स्नानमात्रम् । आचार्यमरणे तत्संस्कार-कर्त्तुः शिष्यस्य[३७] दशरात्रम् । यदि संस्कारं न करोति तदा त्रिरात्रम् । आचार्यपत्नीमरणे तत्पुत्रमरणे गुरुकुलस्थितस्य शिष्य-स्य त्रिरात्रम् ।

उपनीय[३८] यत्किञ्चिद्वेदाध्यापके, अनुपनीय[३९] संपूर्णवेदाध्या-पके गुरौ मृते पक्षिणी । तथाविध-गुरुपत्न्यां च पक्षिणी ।

यत्किञ्चिदध्यापके उपाध्याये एकरात्रम् । तत्पत्न्यां मृतायाम् एकरात्रम् । उपाध्याय-पुत्रे मृते एकदिनमात्रं रात्रिमात्रं वा ।

आचार्यगृहस्थित-शिष्यमरणे आचार्यस्य[४०] त्रिरात्रम् । उपनीय वेदैकदेशमध्यापितस्य, अनुपनीय सम्पूर्णशाखामध्यापितस्य च शिष्यस्य मरणे गुरोः पक्षिणी । यत्किञ्चिदध्यापितस्य शिष्यस्य मरणे एकाहोरात्रम् ।

वेद-सहाध्यायिनि मृते इतरस्य[४१] पक्षिणी । यत्किञ्चित्पाठ-सहाध्यायिनि एकरात्रम् । समानब्रह्मचर्य एकस्मादधीयमाने मृते

---

३७ अत्र शिष्यपदं सर्वत्र असपिण्डशिष्यपरं, सपिण्डानां सम्पूर्णाशौच-विधानात् ।

३८ उपनीयेति—उपनयनपूर्वकं यत्किञ्चिद्-वेदमध्यापयतीति यस्तस्मिन् इत्यर्थः ।

३९ अनुपनीयेति- उपनयनमकृत्वा संपूर्णं वेदमध्यापयतीति यस्तस्मिन् इत्यर्थः ।

४० आचार्यपदम् असपिण्डाचार्यपरम् उक्तयुक्तेः ।

४१ इतरस्य = असंबन्धिनः ।

मृते इरतस्य एकरात्रम् । समानब्रह्मचर्ये भिन्नाद् गुरोरधीयाने अपरस्य एकदिनमात्रं, रात्रिमात्रं वा ।

सन्निधिवासिनि मित्रे मृते सति स्वगृहे गृहस्थितस्य त्रिरात्रम् । अन्यस्मिन् मित्रे स्वगृहे मृते पक्षिणी । अन्यमित्रे मृते एकरात्रम् ।

श्रोत्रिये स्वगहे मृते गृहस्थस्य त्रिरात्रम् । अश्रोत्रिये स्वगृहे मृतेएक रात्रम् । श्रोत्रिये मृते ग्रामावासिनाम् एकरात्रम् ।

यजमानस्य स्वगृहे ऋत्विजि त्रिरात्रम्, अन्यत्र मृते एकरात्रम् ।

सदायाज्ये यजमाने मृते याजकस्य त्रिरात्रम् ।

मातामहे मृते दौहित्रस्य त्रिरात्रम् । मतामह्यां मृतायां पक्षिणी[४२] । मातुले मातृष्वस्रेये[४३] मातुलपुत्रे दौहित्रे भागिनेये च मृते पक्षिणी[४४] । भगिन्यां मातुलान्यां मातृष्वसरि पितृष्वसरि[४५] च मृतायां पक्षिणी[४६] । मातु र्वैमात्रेये, मातु र्मातुलपुत्र, श्वशुरे, श्वश्र्वां श्यालके च मृते एकाहोरात्रम[४७] । निर्गुणजामातुः

---

४२ पक्षिणीति हेया, शास्त्रान्तरसिद्धत्रिरात्राशौचव्यवहारस्य मैथिलगृहीतत्वात् ।

४३ मातृष्वस्रेयः = मातृभगिनीपुत्रः ।

४४ पक्षिणीत्यस्यापि "मातृष्वसृमातुलयोः, श्वश्रु-श्वशुरयोः, गुरौ, ऋत्विजि चोपरते त्रिरात्रमिति" प्रचेतोवचनप्राप्तत्रिरात्राशौचव्यवहारविरोधेन हेयत्वमिति ।

४५ मातृष्वसरि पितृष्वसरि = मातृभगिन्यां पितृभगिन्याम् ।

४६ अत्रापि पूर्वयुक्त्या पक्षिणीति हेया ।

४७ एकाहोरात्रं मैथिलव्यवहाराविषयं, शास्त्रान्तरसिद्धत्रिरात्राशौचस्य व्यवहारसिद्धत्वात् ।

श्वश्र्वाः श्वशुरस्य च मरणे पक्षिणी। स्वगृहे[४८] मृते मातुले, श्वशुरे, गुरौ, स्वगृहे मृतायां मातृष्वसरि, पितृष्वसरि श्वश्र्वां च त्रिरात्रम्।

स्वतन्त्रे राजनि स्वकर्मस्थे[४९] मृते एकाहोरात्रम्। प्रधानकर्मस्थे राजनि मृते दिनमात्रं रात्रिमात्रं वा।

क्षेत्रजादिषु एकादशपुत्रेषु मृतेषु मातापित्रोस्त्रिरात्रम्। क्षेत्रजादीनामपि मातृपितृमरणे त्रिरात्रम्।

परपूर्वासु अन्यगतासु च भार्यासु च मृतासु प्रसूतासु च त्रिरात्रम्। एकमातृकयोर्भिन्नपितृकयोर्भ्रात्रोर्जनने मरणे परस्परं मातृजात्युक्तमशौचं सम्पूर्णं भवति। तयोर्मरणे प्रसवे च पितुस्त्रिरात्रम्। तत्सपिण्डानां तयोर्मरणे एकरात्रमशौचम्। हीनवर्णगामिनीषु भार्यासु नाशौचम्।

१० - निर्हरणाद्यशौचम्

ब्राह्मणस्य धर्मबुद्ध्या अनाथमृतब्राह्मणोद्वहने तथाविधब्राह्मणादौ दाहे[५०] च स्नानमात्रेण[५१] शुद्धिः। [५२]तथाविध-मृतब्राह्मणानुगमने स्नानानन्तरम् अग्निस्पर्श-घृतप्राशनं भवति। तदभावे अहोरात्रव्यपगमेन शुद्धिः। उदासीनस्य स्नेहेन दाहादौ एकाहोरा-

---

४८ स्वगृह इत्युपलक्षणम् अन्यत्रापि त्रिरात्राशौचस्य व्यवहारसिद्धत्वात्।

४९ स्वकर्मस्थे = राजनीत्यादिकर्मस्थे।

५० यत्र विशेषप्रतिबन्धकाद् अपरदिने पूर्वमृतस्य दाहः कृतः तत्रापि मरणावच्छिन्नदिनमारभ्यैव अशौचोपगमः कर्तव्यः।

५१ अत्र "दाहयेद् वाहयेद् वापि त्रिरात्रमशुचिर्भवेदि"त्यादिवचनप्राप्तत्रिरात्राशौचस्य मैथिलव्यवहारात् स्नानमात्रमित्युपेक्षणीयम्।

५२ तथाविधेति अनाथेत्यर्थः। अनुगमने = अनु = पश्चाद् गमने।

त्रमशौचम्[५३] ।

मातुल-मातृष्वस्रेय-पितृष्वस्रेय-मातुलपुत्र-मातुलानी- मृतृष्वसृ-पितृष्वसृ-भगिनी-भागिनेय-मातामह-मातामही-दौहित्र-भागिनीपति-जामातृ-श्वशुर - श्वश्रू-श्यालक - शिष्याचार्याचार्यपुत्राचार्यगुरु-गुरुपत्नी-गुरुपुत्र-ऋत्विग्- याजक - मातृमातुल - मातृमातृष्वस्रेय-मातृपैतृष्वस्रेय - मातृमातृष्वसृ - मातपितृष्वसृ - मातमातुलपुत्राणां दाहादौ[५४] कृते त्रिरात्रम् ।

---

५३ अत्रापि एकाहोरात्रं हेयम्, उक्तयुक्तेः ।

५४ अत्र दाहप्रकरणाद् विशेषो वक्ष्यते —मृतस्य दाहः श्राद्धाधिकारिणा तदनधिकारिणा वा सजातीयेन कर्त्तव्यः । दाह्यशरीरालाभे ब्राह्मणस्याशौचाभ्यन्तरे अष्टमदिने, क्षत्रियस्य दशमदिने, वैश्यस्य त्रयोदश-दिने, शूद्रस्याष्टाविंशदिने पर्णनरदाहः समुचितः शिष्टाचारात् । तदसंभवे नवमैकादश - चतुर्दशोनत्रिंशदिने ब्राह्मणादिचतुर्वर्णानां क्रमेण पर्णनरदाहः । तत्राप्यसंभवे पक्षद्वयानन्तरामावास्यादौ कर्त्तव्यः । यो यन्मासि यत्तिथौ पूर्वं गृहाद् देशान्तरं गतः तन्मासि तत्तिथौ द्वादशवर्षानन्तरं पत्रद्वारापि वार्ता न श्रूयते, तस्य पर्णनरदाहः, तत्तिथेरज्ञाने तन्मासीयामावास्यायां, तन्मासाज्ञाने आषाढस्यामावास्यायां भवति ॥ पर्णनरदाहे कृते पुनरस्थनां लाभे लौकिकाग्निसंस्कारः कर्त्तव्यः । यद्येवं मृतभ्रान्त्या दाहे कृते पुनरागच्छेत तदा प्रायश्चित्तं विधाय स्वाश्रमे प्रविशेत् । अशौचाभ्यन्तरे पर्णनरदाहे कृते यावदवशिष्ट तावदशौचं मरणप्रयुक्ताशौचस्य गुरुत्वात् । पक्षद्वयानन्तरं दाहे त्रिरात्रमशौचं. तत्तृतीयदिने क्षौरादिः, चतुर्थदिने आद्यश्राद्धं, पञ्चमे सपिण्डनमिति विदुषां मैथिलानां परामर्शः । पर्णनरदाहप्रकारो यथा- नारिकेलफलं शिरःस्थाने दत्त्वा शरखण्डचतुष्टयमध्यं पुरुषाकारं विधाय तदुपरि पर्णन्यासं कुर्यात् । यथा-शिरसि-४०, ग्रीवायां-१०, बाहुद्वये —१००, अङ्गुलीषु--१०, उरसि-३०, जठरे —२०, शीर्ष्णे —४, वृषणद्वये--६, उरुदेशे--१०० जानु-जङ्घयोः-३०, पादाङ्गुलीषु-१० पलाशपत्त्राणि दत्त्वा कृष्णसारचर्मणा वेष्टयित्वा ऊर्णसूत्रेण निबद्ध्य सोदकेन यवचूर्णेन लेपयित्वा-"असौ स्वर्गाय लोकाय नमः" इति मन्त्रेण दाहयेत् ॥

दाहादि कृत्वा मृतसम्बन्धिगृहे यो वसति तत्सिद्धान्नं च भुङ्क्ते तस्य मृतजात्युक्तमशौचम्। यस्तु तद्गृहे[५५] न वसति, तदन्नमात्रं भुङ्क्ते तस्य त्रिरात्रमशौचम्। यदि तदन्नं न खादति, केवलं तद्गृहे वसति तदापि त्रिरात्रम्। यो बुद्धिपूर्वकम् अशौचवतामन्नं खादति स तदशौचव्यपगमेन शुद्ध्यति। प्रमादतस्तदन्नभोजने तु न दोषः। दुर्भिक्षे तदन्नभक्षणे यावन्त्येव दिनानि खादति तावन्त्येव दिनान्यशौचम् तदशौचोपगमानन्तरं त्रिरात्रं दुग्धपानरूपं प्रायश्चित्तम्।

यत्र मूल्येन दाहवाहनकृते तत्र दाह्यजात्युक्तमशौचम्। अशुचिभिः[५६] सह शयन-संगमन-वाहनादि कृत्वा तज्जात्युक्तमशौचम्।

---

५५ तद्गृहे = मृतसम्बन्धिगृहे।

५६ प्रसङ्गात् स्नानशुद्धि र्वक्ष्यते—सस्नेहब्राह्मणास्थिस्पर्शेऽकामकृते स्नानमात्रम। कामकृते स्निग्धास्निग्धब्राह्मणास्थिस्पर्शे स्नान, गोस्पर्शनं, सूर्यदर्शनं, विष्णुस्मरणं च। निःस्नेहब्राह्मणास्थिस्पर्शे अकामकृते आचमनमात्रम्। ब्राह्मणेतरमनुष्यसम्बन्धि-स्निग्धास्थिस्पर्शे कामकृते त्रिरात्रमशौचम्। अस्निग्धतदस्थिस्पर्शे अकामकृतेऽहोरात्रमशौचम्। चाण्डाल - म्लेच्छभिल्ल यवनजातिप्रभेदानाम् अकामकृते स्पर्शे स्नानं, कामकृते सचैलस्नानमग्निस्पर्शघृतप्राशनम। रजस्वला - प्रसवानन्तराप्राप्तस्नानसमया-पतित-शवानां स्पर्शेऽकामकृते स्नानं, कामकृते स्नानमग्निस्पर्शघृतप्राशनम्। रजक-(वस्त्ररञ्जनकर्ता) चर्मकृत् - (चमार इति प्रसिद्धः) व्याध-जालोपजीवि-(गोँढि इति प्रसिद्ध)चक्रि-(तैलिकः) ध्वजि-(शौण्डिकः) वध्यघाति - (चौरादिवधे नियुक्तः) शैलूषक- (नाटकाद्यभिनेता)-मुखेभगानां (मुखयोनिः) स्पर्शे शिरोवर्जं स्नानम्। कुक्कुट-गृध्र-खरोष्ट्र-शूकराणां स्पर्शे सचैलस्नानम्। अभक्ष्यपञ्चनखस्नेहास्थिस्पर्शे आचमनम्। भक्ष्यपञ्चनखास्थिस्पर्शे दोषाभाव इति विदुषां परामर्शः।

शिष्यस्य गुरूपाध्यायाचार्यदाहे मूल्येन परद्वारा कारिते दशरात्रमशौचम् । ब्रह्मचारिणः पुत्रादिदाहं कृत्वा एकरात्रम् । क्षत्रियादीनां चतुर्णामनुगमने एकाहोरात्रम् । ब्राह्मणस्य क्षत्रियवैश्यानुगमने एकाहोरात्रम् । शूद्रशवानुगमने त्रिरात्रम् । प्रसंगेन शूद्रशवानुगमने स्नानाग्निस्पर्शघृतप्राशनैः शुद्धिः । असपिण्डे ब्राह्मणे मृते तद्गेहं गत्वा तद्बन्धुभिः सहाश्रुपातमस्थिसञ्चयनात्[५७] पूर्वं कृत्वा सचैलस्नानाचमनेन शुद्धिः । ब्राह्मणस्यास्थिसंचयनानन्तरं स्नानमात्रेण, क्षत्रिये मृतेऽस्थिसंचयनात् पूर्वं रोदने विप्रस्य द्व्यहेन, वैश्येऽपि द्व्यहेन । अस्थिसंचयनादूर्ध्वं क्षत्रिये वैश्ये च मृते दिनमात्रं रात्रिमात्रं वा, शूद्रे मृतेऽस्थिसंचयनात् पूर्वं रोदने विप्रस्य त्रिरात्रम् । अस्थिसंचये एकाहोरात्रम् । क्षत्रिये वैश्ये च मृते अस्थिसंचयनात् पूर्वं क्षत्रियवैश्ययोरश्रुपाते सचैलस्नानम्, अस्थिसंचयनानन्तरं स्नानमात्रम् । शूद्रे च मृते क्षत्रियवैश्ययोः अस्थिसंचयनात् पूर्वं द्व्यहेन तदनन्तर[५८] स्नानमात्रेण शुद्धिः । शूद्रे मृते शूद्रस्यास्थिसंचयनात् पूर्वम् अश्रुपाते एकाहोरात्र, तदनन्तरं सचैलस्नानेन शुद्धिः । यदि च मृतकगेहमगत्त्वा अश्रुपातः तदा सर्वस्मिन् वर्णे सवस्य अस्थिसंचयनात् पूर्वं सचैलस्नानं, तदनन्तर[५९]

---

५७ अस्थिसंचयनपदेन तत्कालो लक्ष्यते अस्थिसंचयनस्य अव्यावर्त्तकत्वात् । स च कालस्तृतीयदिनमिति विदां मतम् ।

५८ तदनन्तरम् = अस्थिसंचयनानन्तरम् ।

५९ अत्र विशेषोऽपि वक्ष्यते मृतपत्यनुमरणे सपिण्डानां सम्पूर्णाशौचं, श्राद्धं स्वाधिकारिणा कर्त्तव्यम् । अस्थिप्रक्षेपकर्त्तुः सपिण्डस्य अशौचाभ्यन्तरे यावदवशिष्टं तावदशौचम्, अन्येषां त्रिरात्रं तदूर्ध्वं सर्वेषां त्रिरात्रमशौचमिति मैथिलानां परामर्शः ।

स्नानमात्रम् ।

११ - अथाधिकारिणः

मृतस्य त्रिविधा क्रिया भवति - पूर्वा, मध्या, उत्तरा चेति । तत्र दाहमारभ्य अशौचान्तं यावत् पिण्डदानादिक्रिया पूर्वा । अशौचापगमानन्तरम् एकादशाहादिसपिण्डनपर्यन्ता मध्यमा । अत ऊर्ध्वं मृतस्य एकोद्दिष्टादिरूपा क्रिया उत्तरा । तत्र त्रयोदशविधानां[६०] पुत्राणां त्रिविधासु क्रियासु अधिकारः । तेषु[६१] च औरसः श्रेष्ठः, तदभावे पुत्रिकापुत्रः, तत्पूर्वपूर्वाभावे उत्तरोत्तराधिकारी । ते[६२] तु-औरस, पुत्रिकापुत्र, कानीन, सहोढ़, गूढ़ोत्पन्न, पौनर्भव, अपविद्ध, दत्तक, क्रीत, कृत्रिम, स्वयंदत्त, पारशवाः ।

---

६० कलौ औरस - पुत्रिकापुत्र - दत्तक - कृत्रिमाणामेव श्राद्धेऽधिकारः । एतच्चतुष्टयभिन्नाः पुत्रा ब्राह्मणै र्न कर्त्तव्याः निषेधात् । अत्र शूद्रस्य पौनर्भवपुत्रोऽप्यधिकारीति विशेषः ।

६१ तेषु=त्रयोदशपुत्रेषु, निर्धारणे सप्तमी ।

६२ त्रयोदश पुत्रानाह--ते तु = त्रयोदशपुत्रास्तु । तेषां लक्षणानि शास्त्रेऽभिहितानि । यथा--विवाहितस्त्रिया स्वोत्पादितः पुत्र औरसाख्यः । कन्यादानकाले 'अस्या यः पुत्रो भविष्यति स मम पुत्र' इति व्यवस्थानन्तरं तस्यां कन्यायां जातः पुत्रः पुत्रिकापुत्राख्यः । मृतस्य, नपुंसकस्य, सन्तानविरोधिव्याधितस्य वा भार्यायां धर्मेण गुरुनियुक्तायां जातः पुत्रः क्षेत्रजाख्यः । पितृगहे कन्या यं पुत्रम् अप्रकाशं जनयेत् तं कन्यापरिणेतुः पुत्रं कानीनं वदेत् । या गर्भवती अज्ञातगर्भा वा परिणीयते स गर्भस्तस्यां जातः परिणेतुः सहोढः । यस्य भार्यायां पुत्र उत्पद्यते सजातीयोयं भवतीति ज्ञानेऽपि कस्मात् पुरुषविशेषाज्जातोऽसाविति न ज्ञायते स पुत्रो गूढोत्पन्नाख्यः । या भर्त्रा परित्यक्ता मृतभर्तृका वा स्वेच्छया अन्यस्य पुन र्भार्या भूत्वा यम् उत्पादयेत् स उत्पादकस्य पौनर्भवाख्यः पुत्रः । मातृपितृभ्यां त्यक्तः, तयोरन्यतरमरणे अन्य-

तत्र विभक्ताविभक्तानां पुत्राणां मध्ये पूर्वस्यां मध्यमायां ज्येष्ठस्याधिकारः। क्षतादिना ज्येष्ठस्यानधिकारे नियतसमयकर्त्तव्येषु एकादशाहादिषु कनिष्ठस्याधिकारः। व्यवहारोऽप्येवमेव। उत्तरक्रियायां तु सर्वेषामधिकारः[६३]।

पुत्राभावे पौत्रोऽधिकारी, तदभावे प्रपौत्रः, तदभावे पत्नी[६४], तदभावे सहोदरः कनीयान्[६५], तदभावे ज्येष्ठः[६६], तदभावे पिता, तदभावे भ्रातृपुत्रः, तदभावे पूर्वक्रियायां मध्यमक्रियायां च सपिण्डा[६७] अधिकारिणः। तदभावे सपिण्डा अधिकारिणी, तदभावे सकुल्याः, तदभावे मातृसपिण्डाः, तदभावे मातृसकुल्याः,

---

तरेण वा त्यक्तो यः पुत्रः स्वीकार्यः सोपऽविद्धाख्यः पुत्रः। मातुः पितुर्वा अनुज्ञाय यं पुत्रं परिग्रहीतुः समानजातीयं तस्यैव प्रीतियुक्तं दद्यात् स दत्तकाख्यः पुत्रः। यः पुत्रार्थं मातापित्रोः सकाशात् यं क्रीणीयात् स क्रीतस्तस्य पुत्रः। यं पुनः समानजातीयं पित्रोः पारलौकिकश्राद्धादिकरणाभ्यां गुणदोषौ भवत इत्येवमादिज्ञं पुत्रगुणैश्च मातापित्रोराराधनादियुक्तं पुत्रं कुर्यात् स कृत्रिमाख्यः पुत्रः। यो मृतमातापितृकः त्यागोचितकारणं विना द्वेषादिना ताभ्यां त्यक्तो वा आत्मानं यस्मै ददाति स तस्य स्वयंदत्ताख्यः पुत्रः। परिणीतायामेव शूद्रायां ब्राह्मणः कामाद् यं पुत्रं जनयेत् स तस्य पारशवाख्यः पुत्रः।

६३ सर्वेषां = त्रयोदशविधानां पुत्राणाम्।

६४ प्रकरणाद् विशेषो वक्ष्यते - रजोयोगेन स्त्रीकर्तृकश्राद्धप्रतिरोधे पञ्चमदिने स्त्रिया श्राद्धं कर्त्तव्यमिति विदुषां परामर्शः।

६५ कनीयान् = कनिष्ठः।

६६ ज्येष्ठः कनिष्ठवैमात्रेयाभावेऽधिकारी।

६७ सपिण्डाः = ज्येष्ठसपिण्डाः, तदभावे कनिष्ठसपिण्डा इत्यत्रैव तात्पर्यम्। सकुल्या दुहितुरभावेऽधिकारिण इति तात्पर्यम्।

कुलद्वयाभावे मातरः, तदभावे यथाकथञ्चित् परिगृहीताः स्त्रियः, तदभावे एकसाथप्रयाताः,[६८] तदभावे राजादेशाद् धनग्राहकोऽधिकारी ।

पितृहीनौ पौत्रप्रपौत्रौ सपुत्रयोरपि पितामहप्रपितामहयोः पार्वणे श्राद्धेऽधिकारिणौ । मृतस्य कन्याविवाहे कन्यादाताऽप्याभ्युदयिकाधिकारी । असमाप्तषड्वर्षस्य पूर्वक्रियामात्रं, तत्र तद्भ्रातृपित्रादयोऽधिकारिणः । असमाप्तद्विवर्षस्य पूर्वक्रियापि नास्ति, किन्तु भूमि-निखननमात्रम् । स्त्रिया अपि द्विवर्षाभ्यन्तरे भूमि-निखननमात्रम् । तदूर्ध्वं विवाहात् पूर्वं पूर्वक्रियामात्रम् । तत्र पिताऽधिकारी, तदभावे भ्रात्रादिः ।

ऊढायास्तु[६९] त्रिविधासु क्रियासु पुत्रोऽधिकारी, तदभावे[७०] सपत्नीपुत्रः, तदभावे स्नुषा[७१], तदभावे पौत्रः, तदभावे प्रपौत्रः, तदभावे सपिण्डाः, तदभावे सकुल्याः, तदभावे पितृसपिण्डादय इति श्राद्धमञ्जरी ।

शूद्रस्य अपरिणीतस्य[७२] द्विवर्षादूर्ध्वं पूर्वक्रियामात्रम् । तत्र भ्रात्रादिरधिकारी । परिणीतस्य त्रिविधा क्रिया, तत्सुतोऽधिकारीति पूर्ववत् । केचित्तु असमाप्तषड्वर्षस्य त्रैवर्णिकस्य, स्त्रीशूद्र-

---

६८ एकसार्थप्रयाताः = येभ्यो विदेश गतस्ते ।

६९ ऊढायाः = विवाहितायाः ।।

७० सपत्नीपुत्राभाव एव पतिरधिकारीति मैथिलाः ।

७१ स्नुषा = पुत्रवधूः ।।

७२ अपरिणीतस्य = अविवाहितस्य ।

योश्च अपरिणीतयोः त्रिविधा क्रिया अनुग्रहत्वादिना आवश्यकीत्याहुरिति श्राद्धकल्प-स्मृतिसारौ ।

गुरुकुलस्थितस्य शिष्यस्य भ्रातृपित्राद्यभावे गुरुरधिकारी, गुरोरपि पुत्र-पत्नी-भ्रातृ - पितृहीनस्य शिष्यः । यजमानस्य अन्येषामभावे[७३] ऋत्विगित्यादि ॥

१२—अनधिकारिणः

पतिताः पाखण्डाश्रिताः[७४] स्तेना[७५] व्रात्याः[७६] आलस्येन अश्रद्धया च स्वकर्मव्यासिनः[७७] निन्दितकर्मकर्त्तारः[७८] मद्यपाः गर्भभर्तृद्रुहस्त्रियः[७९] । आचार्यस्य गुरोश्चोपाध्यायस्य मातापित्रोश्च वहनदहनादावन्याभावे ब्रह्मचारिणो दोषो न भवति ।

१३—उदकानर्हाः

अयथाविधानसंस्कारजाताः, वेदाविहितप्रव्रज्याम्[८०] उपतिष्ठन्तः, शास्त्राविहितशरीरत्यागकर्त्तारः, पाखण्डाश्रिता, गर्भर्तृद्रुहस्त्रियः, मद्यपाः त्रैवर्णिकयोषितः[८१], संन्यासिपुत्राः मृतक्रियायाम् अनधिकारिणः ।

---

७३ अन्येषाम् = भ्रातृपित्रादीनाम् ।

७४ पाखण्डो वेदप्रामाण्यास्वीकर्ता ।

७५ स्तेनाः = स्ववर्णातिरिक्तचौर्यवृत्तयः ।

७६ व्रात्याः = स्वस्वोपनयनकालेऽकृतोपनयनाः ।

७७ व्यासिनः = त्यागिनः ।

७८ निन्दितं कर्म लम्पटत्वादि ।

७९ गर्भभर्तृद्रुहस्त्रियः गर्भं भर्तारंच द्रुह्यन्ति नाशयन्तीति ताः ।

८० वेदाविहित संन्यासकर्मणि प्राप्तिमन्तः ।

८१ ब्राह्मणी = क्षत्रिया -वैश्याः ।

१४ संन्यासिनाम् एकोद्दिष्टविचारः

संन्यासिपुत्रैः साव्वँत्सरिकैकोद्दिष्ट[८२] पार्वणाभ्युदयिकतीर्थश्राद्धानि कर्त्तव्यानि, सामान्यविहितानां संन्यासिपुत्रं प्रति कर्त्तव्यतानिषेधकप्रमाणाभावात् ।

एकोद्दिष्टं न कुर्वीत संन्यासिनां चैव सर्वदा ।
अहन्येकादशे प्राप्ते पार्वणं तु विधीयते ॥

इतिवाक्यन्तु न[८२] साव्वँत्सरिकैकोद्दिष्टश्राद्धनिषेधकम्, एतद्वाक्यस्य पारिजातनिबन्धादिषु सपिण्डीकरणपर्यन्तैकोद्दिष्टप्रकरणे लिखनेन प्रेतोद्देश्यकषोडशश्राद्धनिषेधकत्वव्यवस्थितेः 'संन्यासग्रहणादेव प्रेतत्वं नैव जायत' इत्युपसंहारात् ।

एकोद्दिष्टं यते र्नास्ति त्रिदण्डग्रहणादिति ।
सपिण्डीकरणाभावात् पार्वणश्राद्धमिष्यते ॥

इति शातातपवाक्ये त्रिदण्डग्रहणहेतुकसपिण्डीकरणाभावस्य एकोद्दिष्टनिषेधहेतुत्वेनाभिधानाच्च । किञ्च---

एकोद्दिष्टं जलं पिण्डमशौचं प्रेतसत्क्रियाम् ।
न कुर्याद् वार्षिकादन्यं[८३] ब्रह्मीभूताय [८४]भास्करे ॥

---

८२ प्रसङ्गवशात् सर्ववर्णानाम् एकोद्दिष्टनियमो लिख्यते—यदि जनन-मरणाशौचेन एकोद्दिष्टप्रतिरोधः तदा अशौचापगमानन्तरम् । यदि तत्रापि अशौचमापतति तर्हि एकादश्यां मलमासेऽपि सव्वँत्सरिकैकोद्दिष्टं कर्त्तव्यम् । यदि मरणतिथ्यज्ञानं तदा तत्पक्षैकादश्यां, तिथिपक्षयोरज्ञाने तन्मासस्यैकादश्याम् अमावस्यायां वा, तद्विस्मरणे चैत्रीयैकादश्याम् अमावस्यायां वा एकोद्दिष्टं कर्त्तव्यम् । पर्णनरदाहतिथौ शेषं पूर्ववदिति मैथिलानां परामर्शः ।

८३ अन्यम् = सपिण्डनादि श्राद्धम् ।

८४ ब्रह्मीभूताय = ब्रह्मस्वरूपाय ।

इति दत्तात्रेयवाक्ये वार्षिकैकोद्दिष्टपरिहारेणैव एकोद्दिष्टनिषेधोपगमात्, कतिपयानां साव्वँत्सरिकैकोद्दिष्टाचरणाच्च, कतिपयानामना-चरणस्य प्रकरणानवरुद्धैकोद्दिष्टनिषेधोपगममात्रेणैव उपपत्तेः न साव्वँत्सरिकैकोद्दिष्ट - निषेधोऽवगम्यत इति ।

तच्चैकोद्दिष्टं सामान्यविधिनैव कर्त्तव्यं, विध्यन्तरानुपदेशात्[८५] सर्वैः संन्यासिपुत्रैः कर्त्तव्यं, तत्रापि विशेषश्रवणात् । अतएव पार्वणाभ्युदयिकतीर्थश्राद्धादिकं यतिपुत्रैः कर्त्तव्यमिति श्राद्धपञ्जीलिखनम् । यतेः सपिण्डीकरणान्ता क्रिया सर्वथैवेति श्रीदत्तोपाध्याय - स्मृतिसारलिखनञ्च । एकोद्दिष्टकर्त्तव्यतानिषेधकवाक्यस्य[८६] प्रेतोद्देश्यकैकोद्दिष्टकर्त्तव्यतानिषेधपरत्वं वा ।

ब्राह्मणादि -हते ताते पतिते संगवर्जिते ।
व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ ।।

इति वाक्यं, तदपि त्रिदण्डिसंन्यासिपार्वणश्राद्धनिषेधकम्, एतद्वाक्यस्यैव त्रिदण्डिपार्वणश्राद्धनिषेधकत्वात् । उशनोवाक्येन त्रिदण्डिनां पार्वणविधानादिति गौड़श्राद्धविवेकः, शातातपवाक्येनापि पार्वणविधानात् । वस्तुतो ब्राह्मणहतत्वादीनि पितामहप्रक्रमकश्राद्धविधायकानि । तेन संगवर्जिते जीवति पितरि पार्वण-

---

८५ विध्यन्तरानुपदेशात् विधिवाक्यानामप्राप्तेः ।
८६ निषेधकवाक्यस्य 'एकोद्दिष्टं यते र्नास्ती'त्यादिवाक्यस्य ।

विधायकम् । संगवर्जितः संन्यासी ।।

इति महामहोपाध्याय करमहाकुलसभूत श्रीउमापतिविरचितः
शुद्धिनिर्णयः[८७] समाप्तः ।।

---

८७ गृहिणश्चत्वारो वर्णा अशौचान्ते मुण्डनमाचरन्ति, तत्र किं प्रमाणमिति चेदुच्यते—"पौर्णमास्यां वैरमणे मातरि पितरि चाऽऽचार्ये स्नानं तावन्तं कालमनुभाविनांच परिवापनमित्यादि" द्वैतपरिशिष्टधृतापस्तम्बवचनमेव

प्रमाणम् । अस्यार्थः केशवमिश्रकृतः—मातरि पितरि आचार्ये च वैरमणे विरमणसम्बन्धिनि मरणभाजि सति पुत्रस्य शिष्यस्य च तावन्तं कालं दशाहं व्याप्य स्नानम्, अशौचान्ते शिरोमुण्डनं चेति । न चैतावता मातापित्रो र्मरण एवाशौचान्ते वपनमायातीति वाच्यम्, मातरि पितरि चाऽऽचार्य इत्यस्योपलक्षणत्वात् । अनुभवतीत्यनुभाविनः, अनुभवस्तु मरणजन्याशौचस्य तदनुभवशालिनाम् इत्यर्थकानुभाविनामित्युक्तः । वस्तुतो—

यस्य यस्य च वर्णस्य यद्यत्स्यात् पश्चिमं त्वहः ।
स तत्र वस्त्रशुद्धिं च गृहशुद्धिं करोत्यपि ।
केश - श्मश्रु - नखादीनां यत् त्याज्यं तज्जहात्यपि ।।

इत्यादि - द्वैतपरिशिष्टधृतब्रह्मपुराणीयवचनमपि । एतेन शिखामुण्डनमपि स्यादिति परास्तं, त्याज्यस्यैव वपनश्रवणात्, "श्मश्रुकेशनखान् वापयेदक्षिलोमशिखावर्जमिति" वशिष्ठवचने स्पष्टाभिधानाच्च ।

अतएव द्वैतपरिशिष्टधृताभ्यां "दशमेऽहन्यरण्यं गत्वा कृतश्मश्रुकर्माणः," "याम्यां निष्क्रम्य अशौचान्ते कृतश्मश्रुकर्माण" इति हारीतवचन - विष्णुवचनाभ्यां बहुवचनलिङ्गिताभ्यां पुत्राद्यतिरिक्तानामप्यशौचभाजां वपनं सिद्ध्यति ।

न च सद्यःशौचेऽन्तिमदिनाभावात् कथं तत्संग्रह इति वाच्यम्, अशौचध्वंसदिनस्यैव पश्चिमदिनत्वात्। तदयं समुदायार्थः—सद्यः - पक्षिणी-त्र्यहाद्यशौचान्तेऽशौचभागिनां सर्वेषां श्मश्रुकेशनखानामेव वपनं, न तु शिखादीनाम्। घटादिमृत्पात्रत्यागः, गृहोपलेपनं, वस्त्र प्रक्षालनं चेति ॥

ब्राह्मणादि-चतुर्वर्णानां जनन - मरणाशौचाऽनभिज्ञानां सरलोपायेन झटिति प्रतिपत्तये म० म० मैथिल श्रीउमापतिशर्मणा संगृहीतोऽयं शुद्धिनिर्णयः, लोकोपकाराय मिथिलान्तर्गत -सर्वसीमाग्रामनिवासिना 'खण्डवला' कुलोद्भवेन श्रीमहेश्वरात्मजेन ठक्कुरोपनामकेन तर्कविच्छ्री-श्रीकृष्ण शर्मणाऽनेकप्रबन्धमव - लोक्य शास्त्रसिद्ध-व्यवहारानुसारेण दाहादिप्रकार विलिख्य समलङ्कृतः

१८०८ शकाब्दे ॥

14885

शुद्धिकौमुदी

विद्यावारिधि (डॉ०) श्रीशशिनाथझाशर्मविरचिता

कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः, दरभङ्गा

शाके १९०७ (१९८५ ई०)

शुद्धिकौमुद्या विषयसूची

१ शुद्धिपदार्थः
२ सपिण्डादिमरणाशौचम्
३ विगोत्राशौचम्
४ बालकाशौचम्
५ कन्यकाशौचम्
६ जननाशौचन्
७ अशौचसङ्करः
८ गर्भस्रावाद्यशौचम्
९ शववाहनाद्यशौचम्
१० शस्त्रहतादीनामशौचम्
११ रोदनाद्यशौचम्
१२ अनशौचिनः
१३ श्राद्धाधिकारिणः
१४ अशौचे त्याज्यात्याज्यानि
१५ अशौचान्तिमदिनकर्त्तव्यम्
१६ शरीरशुद्धिः
१७ रजस्वलाशुद्धिः
१८ स्पर्शदोषशुद्धिः
१९ आसन = शय्यादिशुद्धिः
२० वस्त्रशुद्धिः
२१ गृहशुद्धिः
२२ अन्नशुद्धिः
२३ स्वतःशुद्धानि
२४ सुवर्णादिद्रव्यशुद्धिः
२५ भूमिशुद्धिः
२६ जलशुद्धिः
२७ वह्निशुद्धिः
२८ देशाचारशुद्धिः
२९ ग्रन्थकारपरिचयः

★★

विद्यावारिधि(डॉ०) श्रीशशिनाथझाविरचिता

शुद्धिकौमुदी

मङ्गलमणिमयमालां बालां विद्युत्प्रभाजालाम् ।
वन्दे हिमगिरिबालां तपोबलाप्तेश्वरां शुद्धाम् ॥१॥
शुद्धौ वचनराशीनां स्पष्टार्थप्रतिपत्तये ।
विविच्य शशिनाथेन क्रियते शुद्धिकौमुदी ॥२॥
शिष्टव्यवहृतेः सम्यक् शास्त्रतत्त्वं विचार्यते ।
धर्मस्य निर्णयो यस्माद् मिथिलाव्यवहारतः ॥३॥
'विवेकं' 'परिशिष्टं' च 'निर्णयं' 'शुद्धिदीपिकाम्' ।
'पितृकर्म' 'मणिं' चैव 'कृत्यसारसमुच्चयम्' ॥४॥
स्मृतीश्च धर्मसूत्राणि निबन्धांश्च तथा विदाम् ।
विलोक्य शुद्धितत्त्वानां सारमत्र निरुच्यते ॥५॥

अथ शुद्धिपदार्थः

तत्र कर्मार्हत्वसम्पादकसंस्कारविशेषः शुद्धिः। शुद्ध्यभावे श्रुतिस्मृतियाज्ञिकवर्णाश्रमादि-कर्मसु अशुद्धस्य जनस्य जलभूमिपात्रादिवस्तूनाञ्च सम्पर्काभावः। शुद्धिसंस्कारानन्तरम् अशुद्धिकालातीते च तेषां तत्सम्पर्काधिकारो भवति। किञ्च अशौचं हि पिण्डोदकदानादीनां कर्मणां निमित्तभूतं, तदर्थमवश्यं विचारणीयम्।

अथ सपिण्डादिमरणाशौचम्

तत्र मनुः--"शुद्ध्येद् विप्रो दशाहेन, द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन, शूद्रो मासेन शुद्ध्यति ॥

अत्र चतुर्णामपि वर्णानां सम्पूर्णाशौचकालः प्रतिपादितः। सपिण्डे मृते ब्राह्मणस्य दशाहोरात्रं, क्षत्रियस्य द्वादशाहोरात्रं, वैश्यस्य पञ्चदशाहोरात्रं, शूद्रस्य तु त्रिंशदहोरात्रमशौचं भवति। प्रकरणेऽस्मिन् सर्वत्राहःपदमहोरात्रोपलक्षकम्। एवमेव रात्रिपदमपि।

मनुः—दशाहं शावमाशौचं सपिण्डेषु विधीयते।
अर्वाक् संचयनादस्थ्नां त्र्यहमेकाहमेव वा॥

अत्र दशाहपदं स्वस्वसम्पूर्णाशौचोपलक्षकं पूर्ववचनसामञ्जस्यात्। शावं शवसम्बन्धि मृतकाशौचम। अशौचम् आशौचं चेति पर्यायौ "नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानामिति" पाणिनीयसूत्रेण पूर्वपदादेर्वैकल्पिकवृद्धिविधानात्।

अस्थिसंचयात्पूर्वं चतुर्थदिनं यावत् सपिण्डेमृते स्ववेदसकलशाखावेत्तुरग्निहोतृकस्यैकाहमशौचम्, एकगुणरहितस्य त्र्यहं, केवलस्मार्ताग्निमतश्चतुरहं, सकलगुणरहितस्य निर्गुणस्य दशाहमशौचम्। 'निर्गुणो दशभिर्दिनैः' इति पराशरः।

वृहस्पतिः—दशाहेन सपिण्डास्तु शुद्ध्यन्ति प्रेतसूतके।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुद्ध्यन्ति गोत्रजाः॥

अत्रापि दशाहपदं सम्पूर्णाशौचपरम्। सपिण्डपदं च सगोत्रसपिण्डपरम्।

बीजिपुरुषतः पुत्रपौत्रादिक्रमेण सप्तपुरुषान्तर्गताः सर्वेपि परस्परं सपिण्डाः। स्वमारभ्य पितृ - पितामह - प्रपितामहक्रमेण सप्तमपर्यन्तं सर्वेषां सन्तानानां सन्तानिनाञ्च परस्परं सापिण्ड्यम्। सप्तमादूर्ध्वम् अष्टम-नवम - दशमपुरुषाः तत्सन्ततयश्च दशमपुरुषं यावत्सकुल्याः। तत ऊर्ध्वं गोत्रजाः।

शङ्खः—सपिण्डता तु सर्वेषां गोत्रतः साप्तपौरुषी।
पिण्डश्चोदकदानञ्च शौचाशौचं तदानुगम्॥

मत्स्यपुराणे—लेपभाजश्चतुर्थाद्याः, पित्राद्याः पिण्डभागिनः।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम्॥

चतुर्थाद्याः प्रपितामहात्पूर्वपुरुषास्त्रयः लेपभाज इति कथ्यन्ते। पिता, पितामहः, प्रपितामहश्चेति त्रयोऽपि पिण्डभाजो भवन्ति। एवं षट् पुरुषाः, स्वयं पिण्डदश्चेति सप्तपुरुषपर्यन्तं सापिण्ड्यम्। इदमेव सापिण्ड्यमशौचानुगम्।

मनुः सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ॥

पित्राद्यास्त्रयः, लेपभाजश्च त्रय इति षट्पुरुषाः, ततः परं सप्तमे पुरुषे सपिण्डता निवृत्ता भवति।

हारीतः—"अष्टम - नवम - दशमाः सकुल्याः।"

सर्ववर्णानां सकुल्ये मृते त्रिरात्रम्, ज्ञायमानजन्मनामादिके गोत्रजे पक्षिणी, तदभाववति गोत्रजे स्नानपर्यन्तमशौचं भवति।

कूर्मपुराणे—अदत्तानां तथा स्त्रीणां सापिण्डयं साप्तपौरुषम्।
दत्तानां भर्तृसापिण्ड्यं प्राह देवः पितामहः ॥

तेन अविवाहितानां कन्यानां पितृसापिण्ड्यम्, विवाहितानान्तु पतिसापिण्ड्यं भवति। द्वैतपरिशिष्टे केशवमिश्रास्तु पितृकुले कन्यायाः पुरुषत्रयपर्यन्तमेव सापिण्ड्यमशौचोपयोगि, सप्तपुरुषपर्यन्तं पिण्ड - दायाद्युपयोगि, पञ्चपुरुषपर्यन्तं विवाहोपयोगीति वदन्ति। तथाहि,

ब्राह्मे-- सपिण्डता तु कन्यानां सवर्णानां त्रिपूरुषी ॥ इति।

अपकृष्टवर्णेन उत्कृष्टवर्णासु जाता वर्णसङ्करास्तेषां शूद्रवदशौचम्।

ब्राह्मे--शौचाशौचं प्रकुर्वीरन् शूद्रवद् वर्णसंकराः ॥
सूर्योदयात् पूर्वं मृते पूर्वदिनं ग्राह्यं, तदनन्तरं मृते परदिनं ग्राह्यमिति।

काश्यपः--रात्रावेव समुत्पन्ने मृते रजसि सूतके।
पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः ॥

देवलः--अशौचकालाद् विज्ञेयं स्पर्शनं तु त्रिभागतः।
शूद्रविट्क्षत्रविप्राणां यथ शास्त्रोपदेशनम् ।'

तेन अशौचकालात् तत्तृतीयांशकालपर्यन्तमस्पृश्यता, ततः परं स्पृश्यता सिद्धा । तथा च चतुर्थेऽहनि ब्राह्मणः, पञ्चमेऽहनि क्षत्रियः, सप्तमेऽहनि वैश्यः, दशमेऽहनि च शूद्रः स्पृश्यो भवति ।

क्वचिद् देशविशेषे कतिचित्क्षत्रियाः, वैश्याः, शूद्राश्च "सर्वे वा स्यु र्दशाहिनः" इति वचनानुसारेण कुलक्रमागतं दशाहाशौचमाचरन्ति, तेषां तथैव जननमरणयोरशौचमुपदेष्टुमुचितं, पारम्पर्यव्यवहारस्य म०म० गोकुलनाथोपाध्याय-म०म० अमृतनाथोपाध्याय-विद्यावाचस्पतिमधूसूदनोपाध्याय-प्राचार्यवर्यत्रिलोकनाथमिश्रादिभि र्मैथिलमुकुटैरादरणीयत्वेन प्रतिपादनात् । एवमेवैतेषामशौचसंकरोऽपि ब्राह्मणाशौचरीत्यैवोपपादनीयः ।

म० म० देवनाथठक्कुरास्तु "सर्वे वा स्यु र्दशाहिनः" इति वचनमापत्कालविषयकमिति स्मृतिकौमुद्यामाहुः ।

याज्ञवल्क्यः—क्षत्रस्य द्वादशाहानि, विशां पञ्चदशैव च ।
त्रिंशद्दिनानि शूद्रस्य, तदर्धं न्यायवर्त्तिनः ॥

न्यायो द्विजगुरुशुश्रूषा - द्विजोच्छिष्टभोजनादिः । तथाविधानां शूद्राणां पञ्चदशाहोरात्रमशौचं भवति ।

यमः—गतस्य न भवेद् वार्ता यस्य द्वादशवार्षिकी ।
प्रेतावधारणं तस्य कर्त्तव्यं सुतबान्धवैः ॥

गृहात् प्रस्थितस्य ततः प्रभृति द्वादशवर्षपर्यन्तं वार्तानुपलब्धौ मृत इति ज्ञानं कार्यं, तत्प्रयुक्तमशौचादि च ।

अथ विगोत्राशौचम्

बृहस्पतिः—त्र्यहं मातामहाचार्यश्रोत्रियेष्वशुचि र्नरः ।
मातुले पक्षिणी रात्रिः शिष्यर्त्विग् बान्धवेषु च ॥

सर्ववर्णानां मातामहे मृते त्रिरात्रमशौचम् । अत्र मातामहपदं प्रमातामह = वृद्धप्रमातामहयोरप्युपलक्षकम् । तथा हि—

उशनाः---मातामहानां मरणे त्रिरात्रं स्यादशौचकम् ॥

विगोत्राचार्ये तत्पत्न्यां तत्पुत्रे वा गुरुकुलस्थितस्य शिष्यस्य त्रिरात्रं, निवृत्ताध्ययनस्य च गुरुपत्न्यां गुरुपुत्रे च एकाहोरात्रम्, आचार्ये तु त्रिरात्रमेवाशौचम्। एकां शाखामधीत्य श्रोत्रियो भवति, स्वगृहे तन्मरणे त्रिरात्रम्। मातुले, शिष्ये, ऋत्विजि, यजमाने, बान्धवे च मृते पक्षिणी अशौचं भवति। दिनद्वयसहिता रात्रिः, रात्रिद्वयसहितं दिनं वा पक्षिणी। परन्तु अत्र त्रिरात्रव्यवहारो दृश्यते। तत्कारणन्तु, यत्र रात्रौ कश्चिद् मृतः तत्र त्रिरात्राशौचिनां पक्षिण्यशौचिनाञ्च तृतीयदिन एव क्षौरम्, समानकालं यावदेवाशौचम्। तद्दिने क्षौरकर्मप्रयुक्तमशौचं तिष्ठत्येव। यत्र च, दिने कश्चिद् मृतः, तत्र पक्षिण्यशौचिनां द्वितीयदिन एव क्षौरकर्म। इत्थं क्व द्वितीयदिने क्षौरं, क्व तृतीयदिन इति परामर्शापेक्षम्। किञ्च ब्रह्मपुराणे—

भिन्नगोत्राः पृथक्पिण्डाः पृथग्गोत्रकरास्तथा।
सूतके मृतके चैव त्र्यहाशौचस्य भागिनः॥

इति विगोत्रानौरसादिपुत्रविषये त्रिरात्राशौचविधानम्।

किञ्च प्रचेताः--

"मातृष्वसृ - मातुलयोः, श्वश्रू - श्वशुरयोः, गुरौ, ऋत्विजि चोपरते त्रिरात्रम्।"

अङ्गिराः— गृहे यस्य मृतः कश्चिदसपिण्डः कथञ्चन।
तस्याप्यशौचं विज्ञेयं त्रिरात्रमिति निश्चयः॥

इत्यादिवचनैः विगोत्राशौचे सर्वत्र त्रिरात्रमिति मैथिलसम्प्रदायः।

बान्धवास्त्रिविधाः- (१) आत्मबान्धवाः, (२) मातृबान्धवाः, (३) पितृबान्धवाश्चेति। अत्र मातृपदं पितामह्यादे र्मातामह्यादेश्च ग्राहकम्, पितृपदञ्च पितामहादे र्ग्राहकम्। आत्मबान्धवास्तु--

आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः।
आत्ममातुलपुत्राश्च विज्ञेया ह्यात्मबान्धवाः॥

एवमेव पितुः पितृष्वस्रीय - मातृष्वस्रीय - मातुलपुत्राः पितृबान्धवाः। मातुः पितृष्वस्रीय - मातृष्वस्रीय - मातुलपुत्र - पितृव्यपुत्रा मातृबान्धवाः।

वस्तुतस्तु मैथिल - व्यवहारानुसारेण स्वपितामह - मातामहान्यतरसन्ततौ समागताः बान्धवाः, अथ च येषां पितामह - मतामहान्यतरसन्ततौ स्वयं समायाति, तेऽपि बान्धवाः। एतेषां परस्परं बान्धवत्वेन अशौचव्यवस्था। ननु स्वमातृमातुलपुत्रो मातृबान्धवः, किन्तु तस्य स्वयं बान्धवः कथं भवतीति चेत् सम्बन्धस्य द्विष्ठत्वादित्यवगम्यताम्।

गौतमः—"पक्षिण्यसपिण्डे योनिसम्बन्धे सहाध्यायिनि च।"

अत्र योनिसम्बन्धेति पदेनापि स्वपितामहमातामहान्यतरसन्तति मृतव्यक्तिः, मृतव्यक्तिपितामहमातामहान्यतरसन्ततिः स्वयं यदि भवति तर्हि पक्षिण्यशौचं (व्यवहारतस्त्रिरात्रं) भवतीत्यायाति। किञ्च योनिसम्बन्धपदेनैव -श्वश्रूश्वशुर - श्याल - जामातृ - भगिनीपतीनां ग्रहणम्।

यमः—श्वशुरयोश्च भगिन्यां च मातुलान्यां च मातुले।
पित्रोः स्वसरि तद्वच्च पक्षिणीं क्षपयेन्निशाम्॥
मातुले श्वशुरे मित्रे गुरौ गुर्वङ्गनासु च।
अशौचं पक्षिणीं रात्रिं मृता मतामही यदि॥
संस्थिते पक्षिणीं रात्रिं दौहित्रे भगिनीसुते॥

विष्णुः—"सार्वाः पितृपत्न्यो मातरः, तद्भ्रातरो मातुलाः, तदपत्यानि मातुलेयानि।"

एतेन सपत्नीमातुर्भ्रात्रादिष्वपि त्रिरात्रमशौचं भवति।

मनुः—गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन्।
प्रेतहारैः समं तत्र दशरात्रेण शुद्ध्यति॥

त्रिरात्राशौचं सर्ववर्णानां समानं, विशेषरूपेण विधानाभावात्।

विष्णुः—"अनौरसेषु पुत्रेषु जातेषु च मृतेष्वपि"॥

त्रिरात्रमशौचमिति शेषः ।

अथ बालकाशौचम्

याज्ञवल्क्यः—आदन्तजननात् सद्य आचूडान्नैशिकी स्मृता ।
त्रिरात्रमाव्रतादेशाद् दशरात्रमतः परम् ॥

दन्तजननकालात् सप्तममासात् प्राक् षष्ठमासपर्यन्तं बाले मृते तत्सम्वन्धिनां सपिण्डानामसपिण्डानां च सर्ववर्णानां सद्यःशौचम् । "सप्तमे मासि दन्तजननम्" इत्युपनिषद्वलात् । ततः परं ब्राह्मणविषयकमिदं वचनं वक्ष्यमाणवचनसामञ्जस्यात् । चूडासमयपर्यन्तं तृतीयवर्षात् प्राक् "तृतीये वा प्रतिहते" इति स्मृतिबलादेकाहोरात्रमशौचम् । मर्यादायामत्राङ् । व्रतादेशाद् उपनयनकालात् सप्तमवर्षात् प्राक् त्रिरात्रमशौचम् । 'गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्" इति मनूक्तेः गर्भकालमादाय सप्तमवर्ष उपनयनकालः । ततः परं सप्तमवर्षतो दशरात्रमेव । इदञ्चाशौचं पुम्ब्राह्मणविषयकं, कन्याविषये वक्ष्यमाणत्वात् ।

अङ्गिराः—विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकी ।
द्व्यहेन क्षत्रिये शुद्धिस्त्रिभिर्वैश्ये मृते सति ॥
निवृत्तचूडके विप्रे त्रिरात्राच्छुद्धिरिष्यते ।
निवृत्ते क्षत्रिये षड्भिर्वैश्ये नवभिरेव च ॥
शूद्रे त्रिवर्षान्न्यूने तु मृते शुद्धिस्तु पञ्चभिः ।
अत ऊर्ध्वं मृते शूद्रे द्वादशाहो विधीयते ॥
षड्वर्षान्तमतीतस्तु शूद्रः सम्रियते यदि ।
मासिकं तु भवेच्छौचमित्याङ्गिरसभाषितम् ॥

शङ्खः—अनूढभार्यः शूद्रस्तु षोडशाद् वत्सरात् परम् ।
मृत्युं समधिगच्छेच्चेद् मासं तस्यापि बान्धवाः ॥

अनूढभार्यः अकृतविवाहः । एतद्वचनवलात् "षड्वर्षान्ते"ति वचनस्य विवाहितशूद्रविषयकत्वमायाति । षड्वर्षोऽन्ते यस्य असौ पञ्चमवर्षः, तमतीतो प्राप्त इत्यथः । पञ्चमवर्षात् प्राक् स्त्रियाः शूद्रस्य च विवाहः प्रतिषिद्धः । विवाहिते शूद्रे मासमशौचं, षोडशवर्षाधिके चेति फलितार्थः ।

अत्रायं निर्गलितार्थः-जन्मतः षष्ठं मासं यावत् सर्ववर्णानां बालके मृते सद्यश्शौचं, केशनखच्छेदनं स्नानञ्च। मृतकस्य भूमौ गर्त्ते स्थापनम्। अत्र मासगणनं वर्षगणनं वा सौरमानेन कर्त्तव्यम्। अर्थाद् यस्य सौरमासस्य यस्मिन्न शात्मकदिने जन्म, अपरमासे तदंशपूर्त्यैव मासपूर्त्तिः, एवं द्वितीयवर्षे जन्ममासे तदंशपूर्त्यैव वर्षपूर्त्तिः।

ब्राह्मणस्य बाले मृते सप्तममासादारभ्य जन्मतो द्वितीयवर्षं यावदेकाहोरात्रमशौचं केशादिच्छेदनं मृतकस्य भूमौ गर्त्ते स्थापनम्। तृतीयवर्षादारभ्य जन्मतः षड्वर्षं यावत् त्रिरात्रमशौचं मृतकस्य दाहादि च।

क्षत्रियस्य बाले मृते सप्तममासादारभ्य जन्मतो द्वितीयवर्षपर्यन्तं द्व्यहमशौचं, मृतकस्य भूमौ निखननम्। तृतीयवर्षादारभ्य जन्मतः षड्वर्षपर्यन्तं षड्दिनमशौचं, मृतकस्य दाहादि च।

वैश्यस्य बाले मृते सप्तममासा रभ्य जन्मतो द्वितीयवर्षपर्यन्तं त्रिरात्रमशौचं, मृतकस्य भूमौ निखननम्। तृतीयवर्षादारभ्य जन्मतः षड्वर्षपर्यन्तं नवरात्रं, मृतकस्य दाहादि च।

शूद्रस्य बाले मृते सप्तममासादारभ्य जन्मतो द्वितीयवर्षपर्यन्तं पञ्चाहं, भूमिनिखननं च। तृतीयवर्षादारभ्य षोडशवर्षपर्यन्तं द्वादशाहमशौचं, मृतकस्य दाहादि च। विवाहिते तु पञ्चमवर्षादेव मासमशौचं भवति।

विगोत्राणां च त्रिरात्रादधिकमशौचं न भवति। तेन तदधिकमशौचोक्ते तेषां त्रिरात्रमेव ज्ञेयम्।

द्विवर्षाभ्यन्तरे बाले मृते प्रमादाद् दाहे कृते तत्राशौचाधिकं भवति।

ब्राह्मे—ऊनद्विवार्षिकं बालं भूमावेव निधापयेत्।
न द्विवर्षस्य कर्त्तव्या बान्धवैरुदकक्रिया॥
अनतीतद्विवर्षस्तु प्रेतो यत्रापि दह्यते।
अतिमोहाभिभूतैश्च देशसाधर्म्यमादरात्॥
अशौचंब्राह्मणानान्तु त्रिरात्रं तत्र विद्यते।

राज्ञामेकादशाहं तु वैश्यानां द्वादशाहिकम् ।
अपि विंशतिरात्रन्तु शूद्राणां भवति क्रमात् ॥

अथ कन्यकाशौचम्

ब्राह्मे—आजन्मनस्तु चूडान्तं यत्र कन्या विपद्यते ।
सद्यःशौचं भवेत् तत्र सर्ववर्णेषु नित्यशः ॥
ततो वाग्दानपर्यन्तं यावदेकाहमेव हि ।
अतः परं प्रवृद्धानां त्रिरात्रमिति निश्चयः ॥
वाक्प्रदाने कृते तत्र ज्ञेयं चोभयतस्त्र्यहम् ।
पितुर्वरस्य च ततो दत्तानां भर्त्तुरेव हि ॥
स्वजात्युक्तमशौचं स्यान्मृतके सूतकेऽपि च ॥

सर्ववर्णानां कन्यकामरणे जन्मतः चूडाकालपर्यन्तं द्वितीयवर्षं यावत् सद्यश्शौचं, केशादिच्छेदनम्, मृतकस्य गर्त्ते स्थापनम्। तृतीयवर्षादारभ्य 'एषा कन्या मया तुभ्यं दातव्या' इति वाग्दानपर्यन्तमेकाहोरात्रम्, मृतकस्य दाहादि च। वाग्दाने कृते पितृकुले पतिकुले च त्रिरात्रम्। वाग्दाने अकृते प्रवृद्धानां युवत्वं प्राप्तानां पञ्चदशवर्षादधिकवयोवतीनां कन्यानां मरणे पितृकुल एव त्रिरात्रमशौचम। विवाहितानां मरणे तु पतिकुले सम्पूर्णाशौचं, पितृकुले त्रिरात्रमिति।

स्मृतिः—पित्रा दत्ता तु या नारी स्वातन्त्र्यादन्यमाश्रिता।
यं यं श्रितवती भूयः तस्याशौचं त्र्यहं त्र्यहम् ॥
मृतायां वा प्रसूतायां नान्येषामिति निश्चयः ॥

अथ जननाशौचम्

मनुः—यथेदं शावमाशौचं सपिण्डेषु विधीयते ।
जननेऽप्येवमेव स्यान्निपुणं शुद्धिमिच्छताम् ॥
सर्वेषां शावमाशौचं, मातापित्रोस्तु सूतकम् ।
सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ॥

शवसम्बन्धि मृतकाशौचं येषां यथैव भवति तेषां तथैव अशौचं जननेऽपि भवति। तेन ब्राह्मणानां सपिण्डे जाते दशरात्रं, क्षत्रियाणां द्वादशरात्रं, वैश्यानां पञ्चदशरात्रं, शूद्राणां च त्रिंशद्रात्रं जननाशौचं भवति। सर्ववर्णानां बान्धवानां त्रिरात्रमित्यादि मरणाशौचवद् व्यवस्था। शवसम्बन्ध्यशौचमस्पृश्यत्वलक्षणं सर्वेषां सपिण्डानां भवति। किन्तु जन्माशौचे सूतकमस्पृश्यता मातापित्रोरेव भवति। तत्र मातुरेव सूतकमस्पृश्यत्वलक्षणं दशरात्रं तिष्ठति। पिता तु सचैलस्नानं विधाय शुचि भवति। अन्येषां तु सूतके अस्पृश्यता न भवति।

संवर्त्तः—जाते पुत्रे पितुः स्नानं सचैलस्य विधीयते।
माता शुद्ध्येद् दशाहेन स्नानात्तु स्पर्शनं पितुः॥

अङ्गिराः—सूतके सूतिकावर्जमङ्गस्पर्शो न दुष्यति।
संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते॥

अत्र पुत्रपदं सन्तानमात्रपरम्। तेन सन्तानोत्पत्तौ पितुः स्नानानन्तरमेव स्पृश्यता सिद्ध्यति। शुद्ध्येद् इत्यस्य स्पृश्या भवेदित्येवार्थः। न तु दैवकर्माधिकारिण्यपि भवति।

प्रचेताः—"सूतिका सर्ववर्णानां दशरात्रेण शुद्ध्यति।"

दशरात्रेण स्पृश्या भवतीत्यर्थः, अशौचं तु स्वजात्यनुसारेणैव भवति।

पैठीनसिः—"सूतिकां पुत्रजननीं विंशतिरात्रेण स्नातां सर्वकर्माणि कारयेद्, मासेन स्त्रीजननीम्॥"

पुत्रजनयित्रीं सूतिकां विंशत्यहोरात्रेण स्नानोत्तरं सर्वकर्माणि पाक-धान्यावहनन-जलाहरण-गृहसम्मार्जन-गृहादिलेपन-वस्त्रप्रक्षालनादिकार्याणि कारयेत्, कन्याजनयित्रीं तु मासादूर्ध्वम्। एतेन ततः पूर्वं कार्यस्य कारणे प्रत्यवायः। वचनेनानेन प्रसूतायास्तावत्पर्यन्तमशौचमिति व्याख्यानं नोचितं 'कारयेद्' इतिपदेन सूतिकातिरिक्तव्यक्त्यर्थोऽयमादेश इत्यायाति। अपि च, तथा सति 'पुत्रजननी विंशतिरात्रेण शुद्ध्यति' इत्येव वदेत्।

अन्याशौचविषये पैठीनसिस्तथैवादिशति। किञ्च पैठीनसिवचनमिदं 'जननेऽप्येत्रमेव' इतिमनुवचनस्य बाधक साधकं वा? नाद्यं, शूद्राया अपि पुत्रजन्मनि विंशत्यहोरात्रमात्राशौचापत्तेः। न च द्विजातिविषयकमेतदिति वाच्यं, पूर्वतः सर्ववर्णेष्वनुवृत्तेः। न द्वितीयं, मनुप्रतिपादितभिन्नत्वात्। तस्मात् सूतिकायाः स्वजात्युक्तमेवाशौचं, ब्राह्मण्या दशाहं, क्षत्रियाया द्वादशाहं, वैश्यायाः पञ्चदशाहं, शूद्रायाश्च मासम्। किञ्च षण्मासादूर्ध्वं गर्भस्रावे स्वजात्युक्तमशौचं सर्वसम्मतं, तत्र तावत्पर्यन्तं न मरणाशौचमपितु सूतिकाशौचमेव तिष्ठति। अपि च जननाशौचे दशाहाभ्यन्तरे बाले मृते यावदवशिष्टं दशाहस्य तावदेवाशौचं सूतिकायाः। एवं सति एकत्र सूतिकाशौचस्य मनुवचनेन, इतरत्र पैठीनसिवचनेनेति महद्वैषम्यम्। अतएव म० म० केशवमिश्रेण द्वै रशिष्टे उक्तम्:—

"सर्वकर्माणि पाकादिलौकिककर्माणि 'स्नाताम्' इतिवचनात्। विंशाहत्रिंशाहानन्तरं पुनस्तासां स्नानं पाकाद्यनुष्ठानार्थमित्यायाति। वैधकर्मप्रतिबन्धकमशौचं मनूक्तं दशद्वादशाहादिरूपं चतुर्वर्णानामपि स्त्रीणां 'जननेऽप्येवमेव' इति तद्वचनात्।" इति।

इत्थं च सूतिकया रजोवत्या च यथोक्तकालपर्यन्तं किमपि कर्म न कारयेद् इत्यादेशेन कार्ये प्रेरणस्य निषेध एव प्रतीयते। तेन यदि कारयेत् तर्हि प्रायश्चित्ती स्यात्। सूतिकाया श्राद्धकर्त्रीत्वे प्राप्ते कृत्रिमपुत्रद्वारैव श्राद्धनिर्वाह इति व्यवहारः। दशरात्रानन्तरं सूतिकाया मरणाशौचे प्राप्ते तदन्तिमदिने नखच्छेदनादि कुर्यात्।

अथाशौचसङ्करव्यवस्था

ब्राह्मे—आघानां यौगपद्ये तु ज्ञेया शुद्धिर्गरीयसी।
मरणोत्पत्तियोगे तु गरीयो मरणं भवेत्॥

अत्राघपदमशौचोपलक्षकम्। तेन एकरात्रापेक्षया त्रिरात्रं, तदपेक्षया च दशरात्रमशौचम्। जनन-मरणाशौचयोरेकदा प्राप्तयोरल्पदिनव्यापकमपि मरणाशौचंगुरुत्वात् जननाशौचस्य बाधकं भवति। यथा मरणाशौचस्य त्रिरात्रस्य

द्वतीयदिने दशरात्रमपि जननाशौचमुपस्थितं मरणाशौचशुद्ध्यैव समाप्यते।

ब्राह्मे—आद्यं भागद्वयं यावत् सूतकस्य तु सूतके।
द्वितीये पतिते चाद्यात् सूतकाच्छुद्धिरिष्यते॥
अत ऊर्द्ध्वं द्वितीयात्तु सूतकान्ताच्छुचिः स्मृतः।
एवमेव विचार्यं स्यान्मृतके मृतकान्तरे॥

चतुर्धा विभक्तस्याशौचकालस्य आद्यभागद्वयमध्ये, अशौचार्द्ध इत्यर्थः, यदि समानदिनव्यापकं सजातीयं द्वितीयाशौचं निपतति तदा पूर्वाशौचसमाप्त्यैव शुद्धि र्भवति। सजातीयत्वं च सूतकत्वेन मरणत्वेन च। तथा च सूतके सूतकान्तरोपनिपाते, मरणे च मरणान्तरोपनिपात इति बोध्यम्। ततः परं तदशौचार्द्धात् परं द्वितीये सजातीये अशौचान्तरोपनिपाते द्वितीयाशौचसमाप्त्या शुद्धि र्भवति। किन्तु अशौचान्ताहोरात्रे नेयं व्यवस्था। तथाहि—

विष्णुः—"रात्रिशेषे दिनद्वयेन, प्रभाते दिनत्रयेणेति।" रात्रिशेषे अशौचान्ताहोरात्रे सजातीयद्वितीयाशौचनिपाते तदग्रिमेण दिनद्वयेन शुद्धिरुभयोरपि। अशौचान्ताहोरात्रप्रभातकाले सजातीयद्वितीयाशौचनिपाते तदग्रिमेण दिनत्रयेण शुद्धि र्भवति। प्रभातकालश्च सूर्योदयात् प्राग् दण्डचतुष्टयात्मकः। ततः परमेकादशे दिने अशौचाभावाद् द्वितीयाशौचनिपाते न सांकर्यमुभयोः स्वतन्त्रत्वात्।

यमः—अघवृद्धावशौचन्तु पश्चिमेन समापयेत्॥

असम्पूर्णाशौचविषयकमेतदिति शुद्धिविवेके रुद्रधरोपाध्यायाः। तेन असम्पूर्णाशौचे त्र्यहादौ सजातीयद्वितीयाशौचनिपाते द्वितीयेनैव शुद्धिः। सम्पूर्णाशौचे त्र्यहाद्यशौचान्तरोपनिपाते सम्पूर्णाशौचव्यपगमेन शुद्धिः। यथा पितरि मृते तद्दशमदिने मातामहे च मृते पितुरशौचव्यपगमेनैव शुद्धिरिति।

तथा चायं निर्गलितार्थः—

जनन-मरणाशौचयोः सर्वत्र मरणाशौचव्यपगमेन शुद्धिः। अधिकदिन-

व्यापकेन (सम्पूर्णेन) जननाशौचेन अल्पदिनव्यापकस्य (त्र्यहादेः) जननाशौचस्य बाधो भवति। एवं मरणाशौचेन मरणाशौचस्यापि। तेन दशाहाशौचेऽन्तिमदिनेऽपि सजातीयं त्र्यहाशौचं तद्दिन एव समाप्यते। त्र्यहाद्यशौचे सजातीयद्वितीयनिपाते परेण शुद्धिः। सम्पूर्णाशौचपूर्वार्द्धे सजातीयद्वितीयाशौचनिपाते पूर्वाशौचव्यपगमेन शुद्धिः, उत्तरार्धं च अशौचान्तिमात् पूर्वदिनं यावद् द्वितीयाशौचव्यपगमेन शुद्धिः, अशौचान्तिमाहोरात्रे तदग्रिमदिनद्वयेन, अशौचान्तिमरात्रि-प्रभाते सूर्योदयात् प्राग्दण्डचतुष्टयकाले तदग्रिमदिनत्रयेण शुद्धि र्भवति।

प्रातिस्विकन्तु प्रसवनिमित्तकं, रजःप्रस्रावनिमित्तकं चाशौचं नान्याशौचापनेयं, तस्य स्वतन्त्रवचनेन प्रबलत्वात्। अतएव बाले मृते प्रसुताया यावदवशिष्टं दशाहस्य तावदेवाशौचम्। तथा च सूतिका पतिमरणानन्तरं दशाहाभ्यन्तरे (स्वाशौचाभ्यन्तरे) पुत्रजन्मनि कन्याजन्मनि वा स्वजात्युक्तजन्माशौचं समाप्यैव श्राद्धकरणार्हा भवति इति द्वैतपरिशिष्टे केशवमिश्राः। ननु पुत्रजन्मनि विंशतिरात्रानन्तरमेव कर्मार्हेति कथं स्वजात्युक्ताशौचानन्तरमित्युक्तमिति चेदुच्यते तस्य लौकिकपाकादिविषयकत्वात्। विशेषस्तु जननाशौचप्रकरणे द्रष्टव्यः।

अत्रिः—'सूतकाद् द्विगुणं शावं, शावाद् द्विगुणमार्त्तवम्।
आर्त्तवाद् द्विगुणं सूतिरिति वृद्धात्रिभाषितम्॥'

जन्माशौचाद् मरणाशौचस्य बलीयस्त्वं, ततोऽपि रजोयोगसम्बन्ध्यशौचस्य, ततोऽपि सूतिकाशौचस्य प्रातिस्विकत्वात् स्वंप्रतिभवत्वात् (स्वं स्वं प्रति प्रतिस्वं, प्रतिस्वं भवं प्रातिस्विकम्) प्रबलत्वम्। तस्माद् मरणाशौचेपि सूतिका स्वजात्युक्तजन्माशौचसमाप्त्यैव शुद्धा भवति।

रजोयोगाशौचं, सूतिकाशौचं च स्वतन्त्रे, नैते मरणाशौचं बाधयतो, न वा स्वयं बाधिते भवतः। श्राद्धकर्त्री रजस्वला चेद् रजःशुद्ध्यनन्तरमेव श्राद्धं कुर्यात्।

अथ गर्भस्रावाद्यशौचम्

ब्राह्मे—षण्मासाभ्यन्तरं यावद् गर्भस्रावो भवेद् यदि।
तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते ॥
अत ऊर्ध्वं स्वजात्युक्तमशौचं तासु विद्यते।
सद्यःशौचं सपिण्डानां गर्भस्य पतने सति ॥

मरीचिः—गर्भस्रुत्यां यथामासमचिरे तूत्तमे त्र्यहम्।
क्षत्रिये तु चतूरात्रं वैश्ये पञ्चाहमेव च।
अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्त्तिता ॥

गर्भस्रावे तृतीयमासात्षष्ठमास यावद् मासतुल्यदिवसैः सर्ववर्णानां सूतिका शुद्ध्यति—चतुर्थे मासि दिनचतुष्टयेन, पञ्चमे मासि दिनपञ्चकेन, षष्ठे मासि च दिनषट्केन शुद्धिः। अचिरे अल्पकाले मासत्रयाभ्यन्तरे तु अधिकाशौचविधानम्। तत्र उत्तमे ब्राह्मण्यां त्र्यहमशौचं, क्षत्रियायां रात्रिचतुष्टयं, वैश्यायां पञ्चाहं, शूद्रायां चाष्टाहम्। षण्मासादनन्तरं सूतिकायाः स्वजात्युक्तमशौचं भवति। गर्भपाते सामान्यरूपेण सर्ववर्णानां सपिण्डानां तत्रोपस्थितबान्धवानां च सद्यःशौचं केशनखच्छेदनं स्नानञ्च।

अथ विदेशस्थाशौचम्

देवलः—नाशौचं प्रसवस्यास्ति व्यतीतेषु दिनेषु च। ॥

जननाशौचे व्यतीते तच्छ्रवणे अशौचाभावः। तदभ्यन्तरे श्रवणे यावदवशिष्टः कालः तावदेवाशौचम्।

मनुः—विगतं तु विदेशस्थं शृणुयाद् यो ह्यनिर्दशम्।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ॥
अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत्।
संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुद्ध्यति ॥

विदेशोऽत्र ग्रामान्तरमात्रं ग्रामेपि स्थानान्तरमात्रम्। तत्र विगतं मृतम्, अनिर्दशं दशाहाभ्यन्तरं यः शृणुयात् स दशरात्रस्य यावदवशिष्टरात्रमशुचि

र्भवेत्। दशाहे व्यतीते त्रिरात्रमशुचि र्भवेत्, षण्मासं यावदेवाग्निमवचनात्। षण्मासानन्तरमेकाहं, संवत्सरानन्तरं स्नानमात्रेण शुद्धिः।

देवलः—ऊर्ध्वं संवत्सरार्धात्तु श्रूयते चेन्मृतः स्वकैः।
भवेदेकाहमेवात्र तच्च संन्यासिनां न तु ॥

गोतमः— दृष्ट्वा चोर्ध्वं दशम्याः पक्षिणी।'

वचनमिदं षण्मासावध्येव। पक्षिणीत्यस्य मैथिलैस्त्रिरात्रव्यवहारत्वेन स्वीकृतत्वम्। त्रिरात्राद्यल्पाशौचेऽपि तदभ्यन्तरे श्रवणे यावदवशिष्टं दिनमशौचं, तदतिक्रान्ते च षण्मासं यावत्सद्यःशौचम्। ततः परमशौचं नास्ति।

पैठीनसिः—"देशान्तरमृतस्य सद्यःशौचम्।"

देशान्तरमृतस्य वार्ताश्रवणे दशाहाभ्यन्तरे तदनन्तरं वा सद्यःशौचमेव। देशान्तरमत्र पारिभाषिकं गृह्यते।

मनुः— वाचो यत्र विभिद्यन्ते गिरिर्वा व्यवधायकः।
महानद्यन्तरं यच्च तद्देशान्तरमुच्यते ॥
देशनामनदीभेदान्निकटोऽपि भवेच्च यः।
तच्च देशान्तरं प्रोक्तं स्वयमेव स्वयम्भुवा ॥
दशरात्रेण वा यत्र वार्ता न श्रूयते जनात् ॥

बृहस्पतिः—देशान्तरं वदन्त्येके षष्टियोजनमायतम्।
चत्वारिंशद् वदन्त्येके त्रिंशदेके तथैव च ॥

षष्टियोजनान्तरदेशः (२४० क्रोशदूरवर्त्ती) देशान्तरम्। तदभ्यन्तरेऽपि भाषाभेद - गिरि - महानदीव्यवहितदेशोपि देशान्तरम्। मनुष्यगत्या दशरात्रेण यत्रत्या वार्ता न प्रेषयितुं शक्यते तदपि देशान्तरम्।

सद्यःशौचस्थले च असगोत्रकृत्रिमपुत्रादिकर्तृकश्राद्धे अधिकारिणे एकादशाहे सूर्योदयात् प्रागेव मरणवार्ता देया, सूर्योदयोत्तरञ्च श्राद्धाधिकारी दशगात्रपिण्डदानं कृत्वाऽऽद्यश्राद्धं सम्पाद्य क्षौरं कुर्यादिति।

अथ शववाहनाद्यशौचम्

मनुः—असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ।
विशुद्ध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् ॥

अत्र विप्रपदं द्विजपदं च सजातीयोपलक्षकम् । तेन सजातीयमसपिण्डं प्रेतं बन्धुवत् स्नेहानुबन्धेन निर्हृत्य निर्हरणं कृत्वा (दाहसंस्कारे गत्वा वा) त्रिरात्रेण शुद्ध्यति । मातु विजातीयत्वे सति विजातीयमपि तद्बान्धवं निर्हृत्य त्रिरात्रेण शुद्ध्यति ।

प्रचेताः—'दहित्वा च वहित्वा च त्रिरात्रमशुचि र्भवेत्' ।।

सजातीयमसपिण्डं स्नेहानुबन्धेनेति शेषः । अत्र दहित्वा वहित्वेत्यार्ष-प्रयोगौ, लोके तु दग्ध्वा वोढ्वा इत्येव दह - वहधात्वोरनिट्त्वात् ।

पैठीनसिः – "असम्बन्धिद्विजान् दहित्वा सद्यःशौचं, सम्बन्धे सति त्रिरात्रमिति ।"

असम्बन्धीत्यत्र धर्मार्थमिति शेषः । तेन धर्मार्थमसम्बन्धिनं सजातीयं दग्ध्वा सद्यःशौचं, स्नेहानुबन्धेन च त्रिरात्रम् । सम्बन्धिनं दग्ध्वा त्रिरात्रम् । तत्र सम्बन्धे सति मरणकालादेव त्रिरात्रं सम्बन्धाभावे तु स्पर्शकालात् त्रिरात्रम् । यथा सूर्योदयात् पूर्वं मृते अनन्तरं च दाहे तत्सम्बन्धिनां पूर्वदिनत एवाशौचदिनगणना, असम्बन्धिनां तु तद्दिनत इति ध्येयम् ।

पराशरः—अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः ।
पदे पदे यज्ञफलमानुपूर्व्यात्प्नुवन्ति ते ॥
न तेषामशुभं किञ्चित् पापं वा शुभकर्मणाम् ।
जलावगाहनात् तेषां सद्यःशौचं विधीयते ॥

धर्मार्थमनाथब्राह्मणोद्वहने सद्यःशौचम् । तत्संस्कारकर्मणि सम्मिलनेनापि सद्यःशौचम् । शवानुगमनेऽपि सद्यःशौचं, वह्निस्पर्शनादि ।

मनुः—अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा ।

स्नात्वा सचैलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुद्ध्यति ॥
यद्यन्नमत्ति तेषां तु दशाहेनैव शुद्ध्यति ॥
अनदन्नन्नमह्नैव न चेत् तस्मिन् गृहे वसेत् ॥

असम्बन्धी वा दाहसंस्कारे सम्मिल्य मृतस्य सपिण्डानामन्नं चेद् भक्षयति तदा सम्पूर्णाशौचभाग् भवति। यदि केवलं तद्गृहे वसति, तदन्नञ्च न भक्षयति तदा त्रिरात्रेण शुद्ध्यति। यदि तद्गृहे न वसति तदा धर्मार्थं शवानुगमने एकाहेन, स्नेहानुबन्धेनानुगमने तु सर्वत्र त्रिरात्रेणैवेति व्यवस्था।

कूर्मपुराणे—यस्तैः सहासनं कुर्याच्छयनादीनि चैव हि।
बान्धवो वाऽपरो वापि स दशाहेन शुद्ध्यति॥
यस्तेषामन्नमश्नाति सकृदेवापि कामतः।
तदशौचनवृत्ते तु स्नानं कृत्वा विशुद्ध्यति॥

प्रमादादशौचिनामन्नभक्षणे नाशौचम्। कामतः तदन्नभक्षणे सम्पूर्णाशौचानन्तरं शुद्धिः। तत्पाकगृहाद् बहिः अनशौचिकृतपाके भक्षणे तु नाशौचमिति व्यवहारः।

कूर्मपुराण—दशाहेन शवस्पर्शी असपिण्डो हि शुद्ध्यति।
यदि निर्दहति प्रेतं प्रलोभाक्रान्तमानसः॥
षड्रात्रेणाथवा सर्वे त्रिरात्रेणाथवा पुनः॥
मनुः—अवरश्चेद्वरं वर्णमवरञ्च वरो यदि।
अशौचे संस्पृशेन्मोहात् तस्याशौचेन शुद्ध्यति॥

पराशरः—योऽसवर्णं तु मूल्येन नीत्वा चैव दहेन्नरः।
अशौचं तु भवेत्तस्य प्रेतजातिसमं नृप।

वेतनेन दाहसंस्कारे गत्वा सम्पूर्णाशौचम्। उत्कृष्टवर्णो यदि हीनवर्णं दहेद् वहेद् वा तर्हि मृतकजातीयाशौचभाग् भवति। सम्बन्धिनो हीनवर्णस्यापि दाहे त्रिरात्रमेवाशौचम्। प्रेतस्य शूद्रस्यानुगमने स्पर्शमकृत्वा ब्राह्मणः त्रिरात्रेण शुद्ध्यति, प्रायश्चित्ती च भवति। स्पर्शे तु मासमशौचम्।

पराशरः—प्रेतभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः ।
अनुगच्छेन्नीयमानं त्रिरात्रमशुचि र्भवेत् ॥

ब्राह्मे—ब्राह्मणो न दहेच्छूद्रं मित्रं वाप्यन्यमेव वा ।
मोहाद् दग्ध्वा ततः स्नातः स्पृष्ट्वाग्नि तु पिबेद् घृतम् ॥

अथ शस्त्रहतादीनामशौचम्

गार्ग्यः—वृद्धः शौचस्मृते र्लुप्तः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद् यस्तु भृग्वग्न्यनशनाम्बुभिः ॥
तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः ।
तृतीये तूदकं दत्त्वा चतुर्थे श्राद्धमाचरेत् ॥

ब्राह्मे— [illegible]ाप्नुयाल्लोकान् नात्मघाती भवेत् क्वचित् ॥

अतिवार्द्धक्यवशात् शौचादिकरणेऽपि विस्मरणशीलः, महारोगेण दुश्चिकित्स्यो वा जीवनं निरर्थकं कष्टप्रदमात्रं विज्ञाय भृगोः पर्वतप्रपातान्निपत्य प्रदीप्ताग्नौ प्रविश्य, अनशनेन भोजनं विहाय प्रायोपवेशादिव्रतं कृत्वा, अगाधजले वा प्रविश्य यः प्राणत्यागं कुर्यात् तस्य सपिण्डानां त्रिरात्रमशौचम । स प्राणत्यागी च एवंकरणेन नात्महत्याजन्यं पापं लभते, अपितु उत्तमगतिं प्राप्नोति । अग्न्यादिना तत्क्षणं चेन्नापि मृतः पश्चात्तेनैव कारणेन किञ्चिद्दिनानन्तरं मृतश्चेत्तथापि त्रिरात्रमशौचम् ।

अङ्गिराः—व्यापादयेदथात्मानं स्वयं योऽग्न्युदकादिना ।
विहितं तस्य नाशौचं नाग्नि र्नाऽप्युदकक्रिया ॥

यः स्वयं नीरोगः स्वशौचादिक्षमो रोषादिना अग्न्यादिषु आत्मानं घातयेत् स आत्महत्याजन्यं पापं लभत एव । तत्सपिण्डानां बान्धवानां च तत्प्रयुक्तं नाशौचं, न वा तत्कृत उदकदानं कर्त्तव्यम् ।

स्मृतिः—आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया ।
तेषामपि तथा गङ्गातोये संस्थापनं हितम् ॥

कृत्वाग्निमुदकं स्नानं स्पर्शनं वहनं कथाम्।
रज्जुच्छेदाश्रुपातं च तप्तकृच्छ्रेण शुद्ध्यति ॥

रोषादिना विष भुक्त्वा, हिंस्रपशुभ्य आत्मानं समर्प्य, वह्नौ जले वा प्रविश्य, पर्वताद् वा निपत्य ये आत्मानं घातयन्ति तेषामौर्ध्वदैहिकी क्रिया न कर्त्तव्या, केवलं तेषां शवाः गङ्गातोयेऽन्यनद्यां वा निक्षेप्याः। तत्स्पर्शादिकरणे तप्तकृच्छ्रं प्रायश्चित्तम्। स्नेहानुबन्धेन तद्दाहादिकरणेऽप्येवम्। सर्पादिभिः सह क्रीडन्तो येऽपि मारिताः तेषामपि नाशौचम्।

अङ्गिराः—अथ कश्चित् प्रमादेन म्रियेताग्न्युदकादिना।
तस्याशौचं विधातव्यं कार्या तस्योदकक्रिया ॥

यस्तु स्वयं घातार्थं न प्रयतते, किन्तु अनबधानेन वह्नि-जल-वज्र दुष्ट-हिंस्रादिभि र्मृतस्तस्य सम्पूर्णाशौचम्।

यमः—डिम्बाहवहतानाञ्च विद्युता पार्थिवेन च।
गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः ॥

पराशरः--उपसर्गमृते चैव सद्यःशौच विधीयते ॥

बृहस्पतिः--डिम्बाहवे विद्युता च राज्ञा गोविप्र-पालने।
सद्यश्शौचं हतस्याहुस्त्र्यहं चान्ये महर्षयः ॥

याज्ञवल्क्यः--हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनाम् ॥

मनुः---उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च।
सद्यः सन्तिष्ठते यज्ञस्तथाशौचमिति स्थितिः ॥

डिम्बाहवो लगुडादिना युद्धं तेन, विद्युता, राज्ञा, गोब्राह्मणयोः पालने, भूतादिभिः, शस्त्रयुद्धे च हतानां सद्यश्शौचम्।

ब्रह्मपुराणे--प्रमादादपि निश्शङ्कस्त्वकस्माद् विधिदेशितः।
शृङ्गिदंष्ट्रिनखिव्याल-विषविद्युज्जलादिभिः ॥

चण्डालेनाथवा चौरै र्निहतो यत्र कुत्रचित् ।
तस्य दाहादिकं कार्यं यस्मान्न पतितस्तु सः ॥

तेन प्रमादाद् हतानां सम्पूर्णाशौचं, रोषादिना, स्वोत्साहेन, क्रीडनेन हिंस्रादिभिर्मृतानां नाशौचम् । युद्धादिहतानां सद्यःशौचम् ।

दक्षः—स्वस्थकाले त्विदं सर्वं सूतकं परिकीर्त्तितम् ।
आपद्गतस्य सर्वस्य सूतकेपि न सूतकम् ॥

पद्मपुराणे—ब्रह्मदण्डहता ये च, ये चापि ब्राह्मणै र्हताः ।
महापातकिनो ये च, पतितास्ते प्रकीर्त्तिताः ॥
पतितानां न दाहः स्यान्नान्त्येष्टि र्नास्थिसंचयः ।
नाश्रुपातश्च पिण्डो वा कार्यं श्राद्धादिकं क्वचित् ॥

ब्राह्मणविषयकापराधप्रयुक्तदण्डेन हताः, ब्राह्मणद्वारा हताः, महापातकिनश्च पतिता भवन्ति । तेषां मरणे नाशौचादि । अशौचादिकरणे प्रायश्चित्तम् ।

अथ रोदनाद्यशौचम्

याज्ञवल्क्यः—श्लेष्माश्रु बान्धवै र्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः ॥

अतः सामान्यरूपेण मरणोत्तरं रोदनादि प्रतिषिद्धम् ।

पारस्करः—अस्थिसञ्चयनादर्वाग् यदि विप्रोऽश्रु पातयेत् ।
मृते शूद्रे गृहं गत्वा त्रिरात्रेण विशुद्ध्यति ॥
अस्थिसंचयनादूर्ध्वं मासं यावद् द्विजातयः ।
दिवसेनैव शुद्ध्यन्ति वाससां क्षालनेन च ॥
स्वजाते दिवसेनैव, द्व्यहात् क्षत्रियवैश्ययोः ॥

अस्थिसंचयात् पूर्वं ब्राह्मणः शूद्रे मृते तद्गृहं गत्वा यदि अश्रु पातयेत् तदा त्रिरात्रमितरत्र तु सद्यःशौचम् अस्थिसञ्चयनात्परं मासपर्यन्तं तद् गृहे

रोदने ब्राह्मण - क्षत्रिय - वैश्या एकाहोरात्रेण शुद्ध्यन्ति। अस्थिसंचयात् पूर्वं ब्राह्मणः स्वजाते ब्राह्मणस्य असम्बन्धिनो मरणे रोदिति चेत् सद्यःशौचं, क्षत्रियस्य वैश्यस्य वा मरणे रोदिति चेद् द्व्यहेन शुद्ध्यति। तदुत्तरं सद्यश्शौचम्।

पराशरः—मृतस्य यावदस्थीनि ब्राह्मणस्याहृतान्यपि।
तावद् योऽबान्धवस्तत्र रौति तद्बान्धवैः सह॥
स्नानात्तस्य भवेच्छुद्धिस्ततस्त्वाचमनं चरेत्॥

अथानशौचिनः

विष्णुः—"अशौचं न राज्ञां, न व्रते, न सत्त्रिणां सत्त्रे, न कारूणां स्वकर्मणि, न राजाज्ञाकारिणां, न देवप्रतिष्ठाविवाहयोः पूर्वसम्भृतयोः।"

स्वकर्मणि राजनीतौ निरतानां राज्ञां बन्धुमरणेपि नाशौचम्। व्रते कृतसंकल्पानां, यज्ञे कृतसंकल्पानां वृतानां च, स्वकर्मस्थितानां कर्मकारादिकारूणां, राजसेवानिरतानां च नाशौचम्। पूर्वारब्धयो र्देवप्रतिष्ठा - विवाहयोः संलग्नानां नाशौचम्। स्वकर्मस्थित भावे भवत्येवाशौचम्।

प्रचेताः - कारवः शिल्पिनो वैद्याः दासी दासस्तथैव च।
राजानो राजभृत्याश्च सद्यःशौचस्य भागिनः॥

अत्र सद्यःशौचपदेनाशौचाभावो लक्ष्यते। स्वकर्मनिरते नैतेषामशौचम्। तदितरत्र एषामप्यशौचं भवत्येव। अशौचिसम्पर्केपि नैतेषामशौचम्।

कात्यायनः—न त्यजेत् सूतके कर्म ब्रह्मचारी स्वकं क्वचित्।
न दीक्षणात् परं यज्ञे न कृच्छ्रादितपश्चरन्॥
पितर्यपि मृते नैषां दोषो भवति कर्हिचित्।
अशौचं कर्मणोऽन्ते स्यात् त्र्यहं वा ब्रह्मचारिणाम्॥

मनुः—आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात्।
समाप्ते तूदकं कृत्वा त्रिरात्रमशुचि र्भवेत्॥

आदिष्टी ब्रह्मचारी व्रतसमाप्ति यावन्नोदकदानं कुर्यात्। व्रते समाप्ते त्रिरात्राशौचभाग् भवति।

मनुः—वृथासङ्करजातानां प्रव्रज्यासु च तिष्ठताम्।
आत्मनस्त्यागिनाञ्चैव निवर्त्ततोदकक्रिया॥
पाखण्डमाश्रितानां च चरन्तीनां च कामतः।
गर्भभर्तृद्रुहां चैव सुरापीनां च योषिताम्॥

वृथाजातानां स्वधर्मत्यागिनां, सङ्करजातानां वर्णसंकराणां, वृथा प्रव्रज्यावतामविहितप्रकारेण प्रव्रज्यामाचरतां, शास्त्राविहितरीत्या प्राणत्यागिनां च उदकक्रिया निवर्तते, एते उदकानर्हा इति कथ्यन्ते। अत्र पुंस्त्वमविवक्षितं, तेन तथाविधानां नारीणामपि ग्रहणम्। वेदविरुद्धमार्गाश्रितानां, कामतः स्वेच्छया चरन्तीनां, पतिद्रोहिणीनां, मद्यपायिनीनां चोदकक्रिया निवर्तते। एतन्मरणे नाशौचम्। एते च न श्राद्धाधिकारिणः।

याज्ञवल्क्यः—पाखण्ड्यनाश्रिताः स्तेना भर्तृघ्न्यः कामगादिकाः।
सुराप्य आत्मत्यागिन्यो नाशौचोदकभाजनाः।

पराशरः—सम्पर्काद् दुष्यते विप्रो जनने मरणेऽपि च।
सम्पर्कविनिवृत्तानां न प्रेतं नैव सूतकम्॥

अथ श्राद्धाधिकारिणः

व्यासः—न करोति च यः श्राद्धं पित्रादीनां विशेषतः।
पातित्यं जायते तस्य सर्वकर्मविगर्हितम्॥
यस्यैतानि न दीयन्ते प्रेतश्राद्धानि षोडश।
प्रेतत्वं हि स्थिरं तस्य दत्तैः श्राद्धशतैरपि॥

मृतस्य श्राद्धं पुत्रादिभिरधिकारिभिरवश्यं करणीयम्। तेन फलद्वयं जायते—(१) मृतस्य प्रेतत्वविमुक्तिः, (२) कर्त्तुः तदकरणजन्यपापानुत्पत्तिश्च।

मृतस्य और्ध्वदैहिकी क्रिया त्रिधा। भवति—पूर्वा, मध्या, उत्तरा चेति।

तत्र सर्वविधपुत्राणां त्रिविधास्वप्यधिकारः। मातृपितृसपिण्डाः, समानोदकाः, सकुल्याः, बान्धवाः अन्येपि च पूर्वक्रियाधिकारिणः। दाहमारभ्याशौचान्तिमदिनपर्यन्तं पूर्वा क्रिया भवति। एकादशाहादि - सपिण्डनपर्यन्ता मध्या क्रिया, तत्र पुत्रादीनामेव वक्ष्यमाणानामधिकारः। एकोद्दिष्ट - पार्वणादिः उत्तरा क्रिया। तत्रापि पुत्रादीनां भ्रातृसन्ततिपर्यन्तानामधिकारः, किन्तु सर्वविधपुत्राणामुत्तराक्रियानिवार्या।

विष्णुपुराणे--मातृपितृसपिण्डैस्तु समानसलिलैस्तथा ।
तत्संघातान्तर्गतैर्वा राज्ञा वा धनहारिणा ॥
पूर्वाः क्रियास्तु कर्त्तव्याः, पुत्राद्यैरेव चोत्तरा ॥

तत्र पुत्रादिष्वधिकारिषु कश्चिदेक एवाद्यश्राद्धं कर्त्तुमर्हति। तत्पौर्वापर्यक्रमो विचार्यते।

मरीचिः—मृते पितरि पुत्रेण क्रिया कार्या प्रयत्नतः ॥

शङ्खः--"पितुः पुत्रेण कर्त्तव्या पिण्डदानोदकक्रिया ॥"
"पुत्राभावे तु पत्नी स्यात् तदभावे सहोदर.।
श्वश्रूवादेश्च स्नुषा चैव तदभावे सपिण्डकः ॥"
"भार्यापिण्डं पतिर्दद्यात् पत्ये भार्या तथैव च।
तस्य भ्रातृसुतश्चक्रे यस्य नास्ति सहोदरः ॥"

विष्णुः--पुत्रः पौत्रः प्रपौत्रो वा तद्वद् वा भ्रातृसन्ततिः।
सपिण्डसन्ततिर्वापि क्रियार्हा नृप! जायते॥
एषामभावे सर्वेषां समानोदकसन्ततिः ।
मातृपक्षसपिण्डेन सम्बद्धो यो जलेन च ॥

व्यासः--कुलद्वयेपि चोच्छिन्ने स्त्रीभिः कार्या क्रिया नृप।
संघातान्तर्गतैर्वापि कार्या प्रेतस्य सत्क्रिया॥
उच्छिन्नबन्धुऋक्थाद् वा कारयेदवनीपतिः॥

तत्र पितुराद्यश्राद्धे पुत्रोऽधिकारी। पुत्रश्चानेकविधः शास्त्रे प्रतिपादितः। किन्तु कलौ पञ्चविध एव पुत्रः कार्यः— (१) औरसः, (२) पुत्रिकापुत्रः, (३) दत्तः, (४) कृत्रिमः, (५) पौनर्भवश्चेति। तत्र पुत्रिकापुत्रो दत्तश्च मैथिलेषु न प्रचलितौ। पौनर्भवश्च शूद्रस्यैवानूढभार्यायामुत्पन्नो भवति।

बृहस्पतिः—अनेकधा कृताः पुत्रा ऋषिभिर्यैः पुरातनैः।
न शक्यतेऽधुना कर्तुं शक्तिहीनैरिदन्तनैः॥

पराशरः—औरसः क्षेत्रजश्चैव दत्तः कृत्रिमकः सुतः॥

अत्र क्षेत्रजपदमौरसविशेषणम्। विधिवद् विवाहपूर्वकगृहीतभार्यायां सवर्णायां स्ववीर्योत्पादितः पुत्र औरसः, विधिपूर्वकं स्वमातृपितृभ्यां यस्मै प्रदत्तस्स तस्य दत्तकः पुत्रः, अपुत्रः सन् स्वसवर्णं पुत्रगुणयुक्तं यं पुत्रत्वेन स्वीकरोति स तस्य कृत्रिमः पुत्रो भवति। एत एव पुत्राः कलौ कर्त्तव्या इति शेषः।

एतेषु औरसो मुख्यः, अन्ये आरोपितपुत्राः, औरसाभाव एव कार्याः। पौत्र-प्रपौत्रसत्त्वेपि कृत्रिमादयो न कार्याः। भ्रातृजेऽपि सति नान्यः कृत्रिमसुतः कार्यः, तस्य पुत्रत्वातिदेशात्।

मनुः अपुत्रेण सुतः कार्यो यादृक् तादृक् प्रयत्नतः॥

अपुत्रेणेति योग्यपुत्राभाववतेत्यर्थस्तेनातिबाले पुत्रे कृत्रिमः कार्यः।

याज्ञवल्क्यः- सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः॥

मनुः- सदृशं तु प्रकुर्याद् यं गुणदोषविचक्षणम्।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः॥

शाकलः- दौहित्रं भागिनेयं च मातृष्वसृसुतं विना॥

कृत्रिमं पुत्रं कुर्यादितिशेषः।

शौनकः- दौहित्रो भागिनेयश्च शूद्रैस्तु क्रियते सुतः॥

कृत्रिमपुत्रकरणे पुत्रिपुत्रयोरनुमतिरेव व्यवहारे प्रचलितः।

सुमन्तुः- मातुः पितुः प्रकुर्वीत संस्थितस्यौरसः सुतः ।
पैतृमेधिकसंस्कारं मन्त्रपूर्वकमादृतः ॥

श्राद्धाधिकारिप्रथमकक्षायाम् औरसपुत्राणां सर्वेषां ग्रहणम् । श्राद्धं सर्वेषां कर्त्तव्यम् । तत्रानेकपुत्रेषु ज्येष्ठः श्राद्धकर्त्ता इतरे चानुमन्तारो व्ययसहभागिनश्च । परन्तु सर्वेषां पितृश्राद्धकाल उपस्थितिरावश्यकी । अनेकविधपुत्रेष्वपि औरसपुत्रस्य स्वतो ज्येष्ठत्वम् । वयसा कनिष्ठोप्यौरसो ज्येष्ठः, अतएव चापि स एव श्राद्धकर्त्ता भवति । औरसेषु वयःकृतज्येष्ठत्वं तत्रापि एकत्र यथासंभवसमवेतपुत्रनिरूपितं ज्येष्ठत्वं ग्राह्यम् । दत्तकादिपुत्रसत्त्वेपि पश्चादुत्पन्ने औरसे औरस एव ज्येष्ठः स्वीकृतः ।

स्मृतिः- "औरसे पुनरुत्पन्ने ज्यैष्ठ्यं तेषां निवर्त्तते" ॥

हारीतः- अर्वाक् संवत्सराज्ज्येष्ठः श्राद्धं कुर्यात् समेत्य तु ।
ऊर्ध्वं सपिण्डीकरणात् सर्वे कुर्युः पृथक् पृथक् ॥

सुमन्तुः- मातुः पितुः प्रकुर्वीत संस्थितस्यौरसः सुतः ।
पैतृमेधिकसंस्कारं मन्त्रपूर्वकमादृतः ॥

मरीचिः- बहवःस्यु र्यदा पुत्राः पितुरेकत्र वासिनः ।
सर्वेषां तु मतं कृत्वा ज्येष्ठेनैकेन यत् कृतम् ।
द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत् ॥

समेत्य संगत्येत्यर्थः । संस्थितस्य मृतस्य । एकत्र वासिनः सहस्थिताः, तेन विभक्ताविभक्तसाधारण्येन संगतानेकपुत्रविषयकत्वमस्य वचनस्य । अविभक्तेन सर्वेषां सम्मिलितेन द्रव्येण । सर्वैरेव कृतं भवेदिति सर्वेषामेव पापानुत्पाद, पितृप्रेतत्वविमुक्तिश्चेति फलद्वयं भवेदित्यर्थः ।

बहुपुत्रसत्वे सर्वेषां व्ययेन सहयोगेन च ज्येष्ठेनैव श्राद्धं कार्यं, सत्यप्यधिकारे न पृथगनुष्ठानं वचनाभावात् । किन्तु यत्र देशान्तरादौ अनुमतिद्रव्यश्लेषयोरभावस्तत्र पृथगेव श्राद्धम् । अत्र ज्येष्ठादमुपस्थित- योग्यज्येष्ठपरम् ।

तेन उपस्थितपुत्राणां मध्ये यो ज्येष्ठः, कर्मार्हश्चेत्यायाति। तथा च ज्येष्ठेऽनुपस्थिते रोगादिनाऽसमर्थे वा मध्यमः श्राद्धं कुर्यात्। द्वादशाहसमाप्त्यनन्तरं समागतेन ज्येष्ठेन पितुरशौचमासाद्य पुनः पातित्यनिवृत्त्यर्थं श्राद्धं कार्यमेव। एवमेव कनिष्ठपुत्राणामपि, श्राद्धाधिकारित्वात्। पितृमरणश्रवणानन्तरं 'मृते पितरि पुत्रेण' इति मरीचिवचनात् सर्वकर्म कर्त्तव्यमेव। न च जाते श्राद्धे पुनः श्राद्धमसंगतमितिवाच्यम्। सकलपुत्रद्वारा पिण्डे प्राप्ते एव प्रेतत्वविमुक्तिरिति मैथिलपरामर्शात्।

हारीतः- सपिण्डीकरणं यावत् प्रेतश्राद्धानि षोडश।
पृथग् नैव सुताः कुर्युः पृथाग् द्रव्या अपि क्वचित्॥

वृद्धमनुः- 'कुर्यादनुपनीतोपि श्राद्धमेको हि यः सुतः'॥

तेन पञ्चवर्षाधिकोऽनुपनीतोप्यौरसः श्राद्धं कुर्यात्। ततोन्यूनस्त्वयोग्य एव।

औरसपुत्राभावे पौत्रस्तदभावे प्रपौत्रोधिकारी, तदभावे पुत्रिकापुत्रस्तदभावे दत्तकस्तदभावे कृत्रिमः। पौत्र-प्रपौत्रयोरौरसजत्वेन साक्षादात्मसम्बन्धसत्त्वादौरसभिन्नपुत्रापेक्षया प्राथम्यं, 'पुत्रः पौत्रः प्रपौत्रो वा' इति विष्णुस्मृतेः, पुत्रग्रहणेन पौत्रादेरपि ग्रहणाच्च।

कात्यायनः- पितामहः पितुः पश्चान्निधनं यदि गच्छति।
पौत्रेणैकादशाहादि कर्त्तव्यं श्राद्धषोडशम्॥
एतत् पौत्रेण कर्त्तव्यमपुत्रश्चेत् पितामहः॥

तत्र या पुत्राणां बहुत्वे श्राद्धाधिकारिव्यवस्था सैव पौत्रादीनां बहुत्वेपि द्रष्टव्या "बहवः स्युर्यदेति" मरीचिवचने पुत्रपदस्य श्राद्धाधिकारिमात्रोपलक्षकत्वात्। तेन औरसाभावे ज्येष्ठः पौत्रोऽधिकारी। ज्येष्ठत्वं च न वयोमात्रकृतं, किन्तु गुणकृतमपि, "ज्यैष्ठ्यं गुणवयः कृतम्" इत्यभियुक्तोक्तेः। पुत्रेषु वयःकृतं ज्येष्ठत्वं, समानकालोत्पन्नवैमात्रेययो र्मातृगतं ज्यैष्ठ्यमादाय, मातृज्येष्ठत्वं च पूर्वविवाहप्रयुक्तम्। पौत्राणामपि स्ववयःकृतं ज्येष्ठत्वं, समकालोत्पत्तिकत्वे तु पितृगतज्येष्ठत्वमादाय व्यवस्था। एवं प्रपौत्राणामपि।

सपिण्डानां सन्निहितसम्बन्धप्रयुक्तं ज्येष्ठत्वं, तुल्यसम्बन्धानान्तु वयःकृतमिति। एवं प्रकारेण ज्येष्ठव्यवस्था वचनाबोधितापि तर्कनिबन्धना स्वीकार्या, 'यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः' इत्युक्तत्वादाचाराच्चेति अस्मन्मातामहचरणा महावैयाकरणदीनबन्धुझा शर्माणः श्राद्धाधिकारिनिर्णये प्राहुः।

सर्वविधपुत्र-पौत्र-प्रपौत्राभावे पत्नी अधिकारिणी। तत्रापि सवर्णा पूर्वविवाहितेत्यादिरूपेण व्यवस्था। पत्न्या अभावे सहोदरः। बहुषु सहोदरेषु अव्यवहितानुजः, तदभावे व्यवहितानुजस्तदभावे अग्रजः। 'न पुत्रस्य पिता दद्यान्नानुजस्य सहोदरः' इति वचनेन अनुजस्य विद्यमानत्वे अग्रजो नाधिकारीत्येव बोध्यते। सहोदराभावे सहोदरभ्रातृपुत्रः, तेष्वनेकेषु ज्येष्ठः श्राद्धाधिकारी, तदभावे पिता, तदभावे स्नुषा, तदभावे सन्निहितज्येष्ठसपिण्डस्तदभावे पुत्री "अपुत्रस्य च या पुत्री सापि पिण्डप्रदा भवेत्" इति वचनात्, तदभावे समानोदकाः "समानोदकभावस्तु निवर्तेताचतुर्दशात्" इति मनुवचनलक्षितास्तदभावे मातृसपिण्डास्तदभावे मातृसमानोदकास्तदभावे मातरः, तदभावे यथाकथञ्चित् परिगृहीताः स्त्रियः, तदभावे संघातान्तर्गता वाणिज्यार्थमेकसार्थप्रयाताः।

एतेषामभावे बन्धुशून्यस्य तस्य मृतकस्य ऋक्थाद् धनाद् वेतनं दत्त्वा राजा श्राद्धं कारयेदिति।

स्त्रियास्तु प्रथममौरसोऽधिकारी, तदभावे सपत्नीपुत्रस्तदभावे कृत्रिमस्तदभावे पतिस्तदभावे स्नुषा, तदभावे पौत्रस्तदभावे प्रपौत्रस्तदभावे सपिण्डाद्या अधिकारिणः।

स्मृतिः -- विदध्यादौरसः पुत्रो जनन्या और्ध्वदैहिकम्।
तदभावे सपत्नीजः कृत्रिमाद्यास्तु तावृते॥

शङ्खः--भार्यापिण्डं पति र्दद्यात् पत्ये भार्या तथैव च।
श्वश्र्वादेश्च स्नुषा चैव, तदभावे सपिण्डकाः॥

तावृते औरस-सपत्नीजयोरभावे। श्वश्र्वादिपदेन श्वशुरस्यापि ग्रहणम्। स्नुषा पुत्रवधूः

मनुः--बह्वीनामेकपत्नीनामेका चेत् पुत्रिणी भवेत् ।
सर्वास्तास्तेन पुत्रेण प्राह पुत्रवती र्मनुः ॥

तेन सपत्नीपुत्रसत्त्वे न कृत्रिमः कर्त्तुं शक्यते । पौत्रस्तु पितामह्याः सपिण्डीकरणानर्हः । सपत्नीपुत्राभावे तु कृत्रिमपुत्रः सन्नेव पौत्रस्तस्याः सपिण्डीकरणं करोतीति व्यवहारः ।

यद्यपि सपत्नीपुत्रस्य आरोपितमेव पुत्रत्वं, तदपेक्षया पुरुषश्राद्धवत् 'पुत्रःपौत्रःप्रपौत्रो वा' इति वचनेन औरसजस्यैव प्राथम्यमुचितं, तथापि-वचनबलात् सपत्नीपुत्रस्यैव प्राथम्यं, सपिण्डीकरणार्थम् । स्त्रिया औरसादि-पुत्र सपत्नीपुत्र-पतिभिरेव-सपिण्डीकरणं कर्त्तुं शक्यते, नान्यैः, "पुत्राभावे पतिः कुर्यात् पत्यभावे न चेष्यते" इति वचनात् । औरसादिपुत्र -सपत्नीज-पतीनामभावे स्त्रियाः श्राद्धमवीराकल्पविधिना भवति । परन्तु साम्प्रतं मिथिलायां तत्परिस्थितौ कृत्रिमपुत्रेण सपिण्डीकरणं कार्यत एव ।

अविवाहितानां कन्यानां वाग्दत्तानामपि पिताधिकारी "दत्तानामप्यद-त्तानां कन्यानां कुरुते पिता" इति वचनात् । तस्याः पूर्वक्रियामात्रम् ।

जन्मतः षड्वर्षं यावन्मरणे द्विजातेः पूर्वक्रियामात्रम्, तत्र तद्भ्रात्रादयो-ऽधिकारिणः । जन्मतो द्विवर्षन्यूनस्य भूमिनिखननमात्रं, न कापि क्रिया । षड्वर्षादूर्ध्वं त्रिविधापि क्रिया । शूद्रस्याविवाहितस्य द्विवर्षादूर्ध्वं षोडशवर्षं यावत् पूर्वक्रियामात्रं, विवाहितस्य षोडशवर्षाधिकस्य वा त्रिविधा क्रिया ।

अनुपनीतद्विजातेरविवाहितशूद्रस्य चोत्तरा क्रिया कर्त्तव्या अनुग्रहादिना, न त्वावश्यकी ।

स्मृतिः—विभक्ता अविभक्ता वा कुर्युः श्राद्धमदैविकम् ।
मघासु च तथान्यत्र नाधिकारः पृथग् विना ॥

विभक्ता अविभक्ता वा सुताः पितुः अदैविकं वैश्वदेवकर्मरहितम् एको-द्दिष्टं सर्वैः पृथक् पृथक् कार्यमित्यत्र न नियमः । किन्तु मघानिमित्तकश्राद्धेषु तद्भिन्ने पार्वणे च पृथग् विभागं विना सर्वेषां पृथक् पृथक् करणेऽधिकारो नास्ति । अर्थात् ज्येष्ठेनैव सर्वेषां द्रव्येण अनुमत्या च कर्त्तव्यम् ।

'ऊर्ध्वं सपिण्डीकरणात् सर्वे कुर्युः पृथक् पृथक्' इति हारीतवचनस्य स्वयमभिप्रायः सपिण्डीकरणानन्तरमेकोद्दिष्टादिकृत्यं पृथगपि कर्त्तुमर्हति।

पितृहीनौ पौत्रप्रपौत्रौ सपुत्रयोरपि पितामह - प्रपितामहयोः पार्वणेऽधिकारी। कन्याविवाहे पितु र्भिन्नोपि कन्यादाता तत्राभ्युदयिकश्राद्धाधिकारी वचनबलात्।

अथाशौचे त्याज्यात्याज्यकर्माणि

जाबालः – सन्ध्यां पञ्चमहायज्ञान् नैत्यकं स्मृतिकर्म च।
तन्मध्ये हापयेत्, तेषां दशाहान्ते पुनः क्रिया॥

सूतके मृतके च सर्वविधाशौचकाले कर्मानर्हता भवति। अतएव अशौचिना सन्ध्यावन्दनं, पञ्चमहायज्ञा, नित्यकर्माणि तदितरश्रुतिस्मृत्युक्तकर्माणि च न करणीयानि। पुन र्दशाहान्ते स्वस्वाशौचान्ते सन्ध्यादिक्रिया यथापूर्वं कार्याः। पञ्चमहायज्ञाश्च भूतयज्ञो, मनुष्ययज्ञः, पितृयज्ञो, देव–यज्ञो, ब्रह्मयज्ञश्च।

मनुः--उभयत्र दशाहानि कुलस्यान्नं न भुज्यते।
दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्त्तते॥

अत्र अन्नपदं सिद्धान्नपरम्। उभयत्र सूतके मृतके च। दशाहानि स्वस्वाशौचकालपर्यन्तं, कुलस्य मृतककुलस्य। अशौचिनां दानादि निवर्त्तते। अग्निहोत्रिणा तु असिद्धान्नेनाशौचेपि होमः कर्त्तव्य एव।

शङ्खः--'कुमारप्रसवे नाड्यामच्छिन्नायां गुडतैलहिरण्यवस्त्रप्रावरणगोधान्यप्रतिग्रहे न दोषः।"

एतेन जन्मनि नाडीछेदात् पूर्वं दानप्रतिग्रहावपि कर्त्तुं शक्येते।

ब्रह्मपुराणे— देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम्।
आयान्ति तस्मात् तदहः पुण्यं षष्ठं च सर्वदा॥

जन्मनि प्रथमाहः षष्ठाहश्च पुण्याहः, तत्र दानादि कर्तव्यम्। अतएव षष्ठरात्रौ षष्ठिकापूजनमनशौचिवत् कुर्वन्ति।

शङ्खः---मरणादेव कर्त्तव्यः संयोगो यस्य नाग्निना।
दाहादूर्ध्वमशौच स्याद् यस्य वैतानिको विधिः॥

तेनाग्निहोत्रिणां दाहदिनादशौचगणना, तदन्येषां मरणदिनमारभ्येति।

ब्रह्मपुराणे – अपि दातृग्रहीत्रोश्च सूतके मृतके तथा।
अविज्ञाते न दोषः स्याच्छ्राद्धादिषु कथञ्चन॥

अशौचानन्तरमपि तद्वार्तानुपलब्धौ कर्मकरणे न दोषः। विज्ञाते कर्मप्रतिरोधो भवत्येव।

विष्णुः – व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकम्॥
आरम्भो वरणं यज्ञे, संकल्पो व्रतजापयोः।
नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया॥
निमन्त्रणं तु वा श्राद्धे प्रारम्भः स्यादिति स्मृतिः॥

व्रतादिषु तदारम्भानन्तरं ज्ञाते सूतके मृतके वा न कर्मप्रतिरोधः।

स्मृतिः---पितुरब्दमशौचं स्यात् षण्मासं मातुरेव च।
त्रैमासिकन्तु भार्ययास्तदर्धं भ्रातृपुत्रयोः॥

यज्ञकर्मापेक्षया पितुरशौचं वर्षं यावद्, मातुः षण्मासं, भार्यायास्त्रैमासिकं, भ्रातुः पुत्रस्य च सार्धमासिकमशौचं भवति।

आश्वलायनः–"नैवास्यां रात्रावन्नं पचेयुस्त्रिरात्रमक्षारलवणाशिनश्च स्युर्द्वादशरात्रं महागुरुषु।" तेन मरणरात्रौ दाहसंस्काररात्रौ च मृतकगृहवासिनां कृते पाकनिषेधः। तदशौचिनां त्रिरात्रं क्षारलवणभक्षणनिषेधः। महागुरुषु = मातरि पितरि आचार्ये च द्वादशाहोरात्रं क्षारलवणभक्षणनिषेधः। क्षारलवणस्य निषेधात् सैन्धवलवणभक्षणे न दोषः।

मरीचिः--लवणे मधुमांसे च पुष्पमूलफलेषु च।
शाककाष्ठतृणेष्वेवं दधिसर्पिःपयस्सु च ॥
तैलौषध्यजिने चैव पक्वापक्वे स्वयं गृहे।
पण्येषु चैव सर्वेषु नाशौचं मृतसूतके ॥

अशौचिनोप्येतानि वस्तूनि नाशुद्धानि--लवणं, मधु, मांसं, पुष्पं, मूलं, फलं, शाकं, काष्ठं, तृणं, दधि, घृतं, दुग्धं, तैलम्, औषधं, मृगचर्म, पक्वान्नम्, अपक्वान्नं तण्डुलादि च। एतेषु पुष्पं पक्वान्नं च अशौचिहस्ताद् अग्राह्ये, स्वयं ग्रहणे तु न दोषः। एतेषां वस्तूनां दानप्रतिग्रहयो र्न दोष इति भावः।

शङ्खः---"प्रेतपिण्डक्रियावर्जमशौचे विनिवर्तते ।।"

अशौचे प्रेतपिण्डादि कर्त्तव्यमेव, तदितरत् कर्म सन्ध्यादि, देवपूजादि च न कर्त्तव्यम्। केवलं द्विजातिभि र्दशवारं गायत्रीजपः, दशवारं स्वेष्टमन्त्रजपः, अमन्त्रकश्च प्राणायामः कार्यः, "सूतके मृतके कुर्यात् प्राणायाममममन्त्रकमि"ति वचनात् ॥

मनुः--मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ।

गौतमः---"मत्स्यमांसादि न भक्षेयुराप्रदानात् ॥"

आप्रदानाद् आद्यश्राद्धपर्यन्तं मत्स्यमांसादिभक्षणं न कर्त्तव्यम्। प्रदानादित्युक्ते जननाशौचे नायं निषेधः। अशौचाभ्यन्तरे मत्स्यमांसभक्षणनिषेधः सर्वसाधारणः, श्राद्धपर्यन्तं तु सपिण्डानामेव। तेन ब्राह्मणानां सपिण्डे मृते द्वादशाहं यावन्मत्स्यमांसभक्षणनिषेधः, चतुर्दशाहं यावत्क्षत्रियाणां, सप्तदशाहं यावद्वैश्यानां, द्वात्रिंशाहं यावच्छूद्राणामिति। अशौचे दम्पत्योः सहशयनं निषिद्धमत एव पृथगेव शयनमुक्तम्। क्षितावित्युक्ते अशौचे पर्यङ्कादौ शयनं निषिद्धम्।

मार्कण्डेयपुराणे- तैलाभ्यङ्गो बान्धवानामङ्गसंवाहनं च यत्।
तेन वाऽऽप्यायते जन्तु र्यच्चाश्नन्ति सुबान्धवाः ॥

अयञ्च तैलाभ्यङ्गोऽस्थिसञ्चयनानन्तरम्, अशौचोपान्तिमदिने वा।

चाण्डालादिस्पर्शस्नानमशौचेऽपि तत्क्षणमेव कर्त्तव्यं, बाधकाभावात्, सामान्यधर्माचरणवत् ।

अशौचान्तिमदिनकर्त्तव्यम्

बृहस्पतिः--"नवमे वाससां त्यागो नखलोम्नां तदन्तिके ।।"

अत्र नवमपदेनाशौचोपान्त्यदिनं विवक्षितम् । तेनाशौचान्तात् पूर्वदिने वस्त्रत्यागः अशौचान्तदिने च क्षौरकर्म । इदं मरणाशौच एव न जननाशौचे । तत्र तु स्नानमात्रेण शुद्धिः ।

आपस्तम्बः--"पौर्णमास्यां, वैरमणे मातरि पितरि चाचार्ये चोदकदानं, तावन्तं कालमनुभाविनाञ्च परिवापनम् ।"

सामान्यतया गृहस्थानां कृते स्वेच्छया पूर्णिमायां केशच्छेदन, नान्यदा 'वृथा न विकचो भवेदि'ति वचनात् । वैरमणे विरमणसम्बन्धिनि मरणभाजि पित्रादौ सति पुत्रादीनाम् अनुभवशालिनाञ्च अशौचिनामित्यर्थः, उदकदानं परिवापनञ्च केशश्मश्रुमुण्डनं कार्यं भवति । अत्र पित्रादिग्रहणं ब्राह्मणवशिष्ठन्यायेन । वस्तुतः सपिण्डादीनां मरणे वपनमावश्यकमित्युचितम् ।

विष्णुः—"अस्यां निष्क्रम्याशौचान्ते कृतश्मश्रुकर्माणः ।"

हारीत—"दशमेऽहन्यरण्यं गत्वा कृतश्मश्रुकर्माणः ।।"

दशमेऽहनीत्यनेन अशौचान्तदिनमुलक्ष्यते । अरण्यं गत्वेत्युक्तत्वादेव क्षौरकर्म गृहाद् बहिरेव क्रियते । श्मश्रुपदं केशनखादीनामप्युपलक्षकम् ।

ब्राह्मे - यस्य यस्य च वर्णस्य यद् यत् स्यात् पश्चिमं त्वहः ।
स तत्र वस्त्रशुद्धिं च गृहशुद्धिं करोत्यपि ।।
समाप्य दशमं पिण्डं यथाशास्त्रमुदाहृतम् ।
ग्रामाद् बहिस्ततो गत्वा प्रेतस्पृष्टे च वाससी ।।
अन्त्यानामाश्रितानां च त्यक्त्वा स्नानं करोति च ।
केशश्मश्रुनखादीनां यत्त्याज्यं तज्जहात्यपि ।।

पश्चिममहः अशौचान्तिमदिनम्। तत्र पिण्डदानानन्तरं श्राद्धकर्त्तुरन्येषां च सम्बन्धिनां केशश्मश्रुनखच्छेदनं कार्यम्। तत्र शिखादि न वपनीयम्।

वसिष्ठः - "श्मश्रुकेशनखान् वापयेदक्षिलोमशिखावर्जम्॥"

अशौचान्तदिने वस्त्रदीनां प्रक्षालनम्। सपिण्डगृहाणामुपलेपनम्। प्रेत-स्पृष्टवस्त्राणां सर्वथा त्यागः। व्यवहृतमृद्भाण्डादीनां च त्याग आवश्यकः।

अपरार्के "उदङ्मुखः प्राङ्मुखो वा वपनं कारयेत् सुधीः॥"

पूर्वाभिमुख उत्तराभिमुखो वा केशच्छेदनमुचितं नेतराभिमुखः।

ज्यौतिषे - क्षौरं नैमित्तिकं कार्यं निषेधे सत्यपि ध्रुवम्।
पित्रादिमृतियात्रासु प्रायश्चित्ते च तीर्थके॥

तेनाशौचान्तिमदिने शनि - रवि मङ्गलवारेपि क्षौरं कर्त्तव्यमेव। क्षौर वर्ज्यसमये त्रौरकरणे मन्त्रोऽयं पठनीयः---

केशवमानर्त्तपुरं पाटलिपुत्रपुरीमहिच्छत्राम्।
दितिमदितिञ्च स्मरतां क्षौरविधौ भवति कल्याणम्॥

अथ शरीरशुद्धिः

मनुः -अद्भिर्गात्राणि शुद्ध्यन्ति मनः सत्येन शुद्ध्यति।
विद्यातपोभ्यां भूतात्मा बुद्धि र्ज्ञानेन शुद्ध्यति॥
वसा शुक्रमसृङ्मज्जा मूत्रविड् घ्राणकर्णविट्।
श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः॥

वसादयो द्वादश नराणां दैहिका मला भवन्ति-- वसा कायस्नेहः, शुक्रं वीर्यम्, असृक् शोणितं, मज्जा शिरामध्ये पिण्डितस्नेहः, मूत्रं, विष्ठा, घ्राण-विट् नासिकास्थशुष्कमलः 'नकटी' इति प्रसिद्धः, कर्णविट् कर्णमलः 'गुज्जी' इति प्रसिद्धः, श्लेष्मा कफः ष्ठीवनं च, अश्रु नेत्रजलम्, दूषिका नेत्रमलः 'काँची' इति प्रसिद्धः, स्वेदश्च देहनिःसृतं जलञ्चेति।

बोधायनः- आददीत मृदोऽपश्च षट्सु पूर्वेषु शुद्धये।
उत्तरेषु च षट्स्वद्भिः केवलाभि र्विशुद्ध्यति॥

एतेषु द्वादशसु मलेषु षण्णां पूर्वार्द्धानां शुद्धि मृद्भिः जलेन च भवति, उत्तरार्द्धानां षण्णां शुद्धिस्तु केवलेन जलेन ।

ऋष्यशृङ्गः- यस्मिन् स्थाने कृतं शौचं वारिणा तद् विशोधयेत् ।
न शुद्धिस्तु भवेत् तस्य मृत्तिकां यो न शोधयेत् ॥

देवलः- मानुषास्थि वसां विष्ठामार्त्तवं मूत्ररेतसी ।
मज्जानं शोणितं स्पृष्ट्वा परस्य स्नानमाचरेत् ॥

परस्य अन्यस्य, स्वस्य स्पृष्ट्वा तु मृज्जलाभ्यां क्षालनम् ।

मनुः- एका लिङ्गे, गुदे तिस्रः, तथैकत्र करे दश ।
उभयोः सप्त दातव्याः मृदः शुद्धिमभीप्सता ॥

मूत्रपुरीषोत्सर्गे शुद्धिमिच्छता लिङ्गादिषु एकादिमृत्तिका देयाः । एतद् गृहस्थानां कृते, ब्रह्मचारिणां द्विगुणं, वानप्रस्थानां त्रिगुणं, यतीनां च चतुर्गुणं शौचं कर्त्तव्यम् ।

पैठीनसिः- "अनुदके मूत्रपुरीषकरणे स्नानम्" ।

देवलः- शौचविद् दक्षिणं हस्तं नाधःशौचे नियोजयेत् ।
तथैव वामहस्तेन नाभेरूर्ध्वं न शोधयेत् ॥

दक्षः- अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः ।
स्रवत्येष दिवारात्रौ प्रातःस्नानेन शुद्ध्यति ॥
यथाऽहनि तथा प्रातः नित्यं स्नायादनातुरः ।
दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत् ॥

यमः- आतुरस्नानसम्प्राप्तौ दशकृत्वस्त्वनातुरः ।
स्नात्वा स्नात्वा स्पृशेद् गात्रं ततः शुद्ध्येत् स आतुरः ॥

यदि रोगेण अत्यन्ताशक्तो दानादि चिकीर्षु भवति तर्हि स्नातस्वस्थजनस्पर्शेन शुद्ध्यति । अस्नातजनस्य देहे दुष्टविद्युतो भवन्ति ताः स्नातव्यक्तिस्पर्शे तत्र समायान्ति, स्नाने कृते च जले नष्टा भवन्ति । एवं वारंवारं

स्नाते स्पर्शे च कृते अस्नातशरीरस्था अपि दुष्टविद्युतो विनष्टा भवन्ति। रजस्वलाशुद्धिरपि असामर्थ्ये एवमेव भवति।

हारीतः- "देवागन्तुकाम आचामेत्" ।

बौधायनः- 'नीवीं विस्रंस्य परिधायोपस्पृशेत्" ।

मनुः- सर्वेषामेव शौचानामर्थशौचं परं स्मृतम् ।
योऽर्थे शुचि र्हि स शुचिः, न मृद्वारिशुचिः शुचिः ॥

अर्थस्य आदानप्रदानयोः स्पष्टव्यवहारः अर्थशुचिरुच्यते। तत्रान्यदीयार्थस्यात्मसात्करणं सर्वाशुचित्वं भजते।

बृहस्पतिः- परापवादाश्रवणं परस्त्रीणामदर्शनम् ।
एतच्छौचं श्रोत्रदृशो जिह्वाशौचमपैशुनम् ॥
प्राणिनामवधोऽस्तेयं शचित्वं पादहस्तयोः ।
असंश्लेषः परस्त्रीणां शारीरं शौचमुच्यते ॥

सरागं श्रवणादौ अशुचित्वं, नान्यथा।

मनुः- त्रिराचामेदपः पूर्वं, द्विः प्रमृज्यात् ततो मुखम्।
शारीरं शौचमिच्छन् हि, स्त्रीशूद्रस्तु सकृत् सकृत् ॥

द्विजातिभि र्मृज्जलादिशुद्ध्यनन्तरं देवादिकार्येषु प्रविविक्षुणा त्रिराचमनं ततो मुखस्य वारद्वयं परिमार्जनं कार्यम्। स्त्रीभिः शूद्रैश्च सकृदेवाचमनं सकृदेव च परिमार्जनं कार्यम् ।

मनुः- सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतानि च।
पीत्वापोऽध्येष्यमाणश्च आचामेत् प्रयतोऽपि सन् ॥

शातातपः- वातकर्मणि, निष्ठीव्य, दन्ताश्लिष्टे तथानृते ।
क्षुते, पतितसम्भाषे, दक्षिणं श्रवणं स्पृशेत् ॥
दन्तलग्ने फले मूले भक्ष्ये स्नेहे तथैव च ।
ताम्बूले चेक्षुखण्डे च नोच्छिष्टो भवति द्विजः ॥

अथ रजस्वलाशुद्धिः

यमः - स्त्रियः पवित्रमतुलं नैता दुष्यन्ति कर्हिचित् ।
मासि मासि रजस्तासां दुष्कृतान्यपकर्षति ।।
मनुः—शुद्धा भर्त्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला ।
दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुद्ध्यति ।।

रजोदर्शनाच्चतुर्थे दिने स्नानानन्तरं भर्त्तुः कृते, पञ्चमे दिने च देवपितृकर्मकृते पाकादौ च रजस्वला शुद्धा भवति। सूर्योदयात् पूर्वं रजोदर्शने पूर्वदिनाद् गणना, सूर्योदयानन्तरं च तद्दिनाद् गणना भवतीति पूर्वमेवोक्तम् । प्रथम - द्वितीय - तृतीयदिनेषु सा अशुद्धा अस्पृश्या च भवति ।
पैठीनसिः—"त्रिरात्रं मलवद्वासोधारयमाणा न स्नायात् । नाभ्यञ्जीत । नाञ्ज्यात् । न नखान्निकृन्तेत् । नोपमार्जयेत् । न रज्जुं सृजेत् । न दन्तान् धावयेत् । न स्रजं धारयेत् । न गन्धान् सेवेत ।"

अत्रिः - रजस्वला यदि स्नाता पुनरेव रजवस्ला ।
अष्टादशदिनादर्वागशुचित्वं न विद्यते ।।
एकोनविंशतेरर्वागेकाहन्तु, ततो द्वयहम् ।
विंशात् प्रभृत्युत्तरेषु त्रिरात्रमशुचि र्भवेत् ।।

रजोदर्शनादष्टादशदिनं यावत्, स्नानदिनाद् वा चतुर्दशदिनं यावत् पुनरपि रजस्वला भवति चेन्नाशुचित्वं, तेन सद्यःशौचं भवति । ततः परमेकोनविंशे दिने एकाहोरात्रं, विंशे दिने द्व्यहं, तदुत्तरं च त्र्यहमशुद्धि र्भवति ।

उशनाः—ज्वराभिभूता या नारी रजसा च परिप्लुता ।
कथं तस्या भवेच्छौचं शुद्धिः स्यात् केन कर्मणा ।।
चतुर्थेऽहनि सम्प्राप्ते स्पृशेदन्या तु तां स्त्रियम् ।
सा सचैलावगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत् ।।
दश द्वादशकृत्वो वा आचामेच्च पुनः पुनः ।
अन्ते च वाससां त्यागस्ततः शुद्धा भवेच्च सा ।।

पराशरः—स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला ।
पात्रान्तरेण तोयेन स्नानं कृत्वा व्रतञ्चरेत् ।

रजस्वलाया दिनत्रयाभ्यन्तरे ग्रहणादिनिमित्तकस्नाने प्राप्ते उद्धृतोदकेन स्नानं, ततः परं रजस्वलानियमपालनञ्च। एतेन रजस्वलाया नद्यादौ सर्वथा स्नाननिषेधः। सत्यावश्यकत्वे उद्धृतजलेन स्नानम्।

अङ्गिराः—चाण्डालः श्वपचो वापि यद्यात्रेयीं स्पृशेत् स्त्रियम्।
अफालकृष्टै वर्तेत पञ्चगव्येन शुद्ध्यति ॥

अस्पृश्यस्पर्शे रजस्वलाया न स्नानम्, किन्तु उपवासः, अफालकृष्टोत्पन्नान्नभक्षणं वा। चतुर्थेहनि स्नात्वा पञ्चगव्येन शुद्धिः। रजोवतीनां परस्परं स्पर्शनिषेधः। सति स्पर्शे सजातीयासु एकरात्रमुपवासः, ब्राह्मण्याः क्षत्रियास्पर्शे त्रिरात्रं, वैश्यास्पर्शे पञ्चरात्रं, शूद्रास्पर्शे षड्रात्रमुपवासः। क्षत्रियाया वैश्यास्पर्शे त्रिरात्रं, शूद्रास्पर्शे त्रिरात्रम्, हीनवर्णाया उच्चवर्णास्पर्शे एकाहोरात्रमुपवासः। अयञ्चोपवासः कामतः स्पर्शे, अकामतस्तु तदर्धमिति।

स्वच्छन्दगा तु या नारी तस्यास्त्यागो विधीयते।
न चैव स्त्रीवधं कुर्यान्न चैवाङ्गविकर्त्तनम् ॥

याज्ञवल्क्यः—व्यभिचाराद् ऋतौ शुद्धि र्गर्भे त्यागो विधीयते।
भर्तृगर्भवधे तासां तथा महति पातके ॥

कदाचिद् व्यभिचारिणी भार्या ऋतुकालपर्यन्तमशुद्धा, ऋतौ शुद्धा भवति। सति गर्भे त्याज्या एव। सदा व्यभिचारिणी तु त्याज्या। महापापिनी, हीनवर्णगामिनी, गर्भघातिनी च त्याज्या।

पैठीनसी:—"चतूरात्रेण स्नातां सर्वकर्माणि कारयेत्।"

पाक - जलाहरण - धान्यावहनन - सम्मार्जनादिकर्माणि कारयेत्। एतेन चतूरात्रमध्ये कार्यं कारयित्वा प्रायश्चित्ती भवेदित्यर्थः।

रजोवतीं प्रति प्रणामावश्यकत्वे तच्चरणसमीपभूमिं स्पृष्ट्वा प्रणमेत्।

अथ स्पर्शदोषशुद्धिः

पैठीनसिः - "उच्छिष्ट - रेतोविण्मूत्रं संस्पृश्योन्मृज्याचम्य शुद्धो भवति, त्रिःप्रक्षाल्य च तं देशम् ॥"

मनुः—नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुद्ध्यति ।
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य च ॥

स्निग्ध - मनुष्यास्थिस्पर्शनेन ब्राह्मणादयः स्नानेन शुद्ध्यन्ति, आचमनेन चास्निग्ध - स्पर्शेन ।

विष्णुः—"पञ्चनखास्थ्यस्नेहं स्पृष्ट्वाऽऽचामेत्, चाण्डालम्लेच्छभाषणे च ।"

भक्ष्यपञ्चनखास्थिस्पर्शे स्निग्धे स्नानं, अस्निग्धे आचमनम् । चाण्डालेन म्लेच्छेन च वार्तालापे आचमनम् । अभक्ष्यपञ्चनखास्थिस्पर्शे स्नानम् ।

व्यासः—भासवानरमार्जारखरोष्ट्राणां शुनां तथा ।
सूकराणाममेध्यं वै स्पृष्ट्वा स्नायात् सचैलकम् ॥

भासो गृध्रः, खरो गर्दभः, श्वा कुक्कुरः, अमेध्यं विष्ठास्थिचर्माणि ।

संवर्त्तः - चर्मारं रजकं वेणुं धीवरं नटमेव च ।
एतान् स्पृष्ट्वा नरो मोहादाचामेत् प्रयतोपि सन् ॥

वेणुं व्याधं वर्णसंकरं च, ग्रामकुक्कुट - गृध्रोलूक - सूकर - खरोष्ट्र - कुक्कुर - विडाल - वानर - काकाद्यशुचिपशुपक्षिस्पर्शे,म्लेच्छानार्यसच्छूद्राशुचिनरप्रभृतिस्पर्शे, अशुचिद्रव्यस्पर्शे च मार्जनमाचमनञ्च । एतैः शिरःस्पर्शे तु स्नानम्, अत्यन्तस्पर्शे च । अशुचिजातीनां चाशुचिकर्मस्थानामत्यन्ताशुचित्वं, तत्कर्मातिरिक्तकाले स्नानपूतानां स्पर्शे नाशुचित्वं, मार्गे तत्स्पर्शे नाशूचित्वं, किन्तु स्वग्रामे अशुचित्म् ।

वशिष्ठः—"मानुषास्थिस्निग्धं स्पृष्ट्वा त्रिरात्रमशौचम्, अस्निग्धे त्वहोरात्रम् ।"

अत्र कामकृते इति शेषः । अकामकृते तु पूर्वैव व्यवस्था ।

देवलः—श्वपाकं पतितं व्यङ्गमुन्मत्तं शवहारकम् ।
सूतिकां सूयिकां नारीं रजसा च परिप्लुताम् ॥
श्वकुक्कुटवराहांश्च ग्राम्यान् संस्पृश्य मानवः ।
सचैलं सशिरः स्नात्वा तदानीमेव शुद्ध्यति ॥

श्वपाकश्चाण्डालः, सूयिका प्रसवकारयित्री। एतत्स्पर्शे सचैलं स्नानमाचरणीयम्।

एतत्स्पर्शिनां स्पर्शे कामकृते स्नानमकामकृते त्वाचमनम्। तत्स्पर्शिनां तृतीयकक्षागतानां स्पर्शे तु हस्तपादप्रक्षालनमाचमनञ्च।

देवलः - संस्पृश्याशुचिसंस्पृष्टं तृतीयं वापि मानवः।
हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुद्ध्यति॥

ब्राह्मे - उच्छिष्टेनाथ विप्रेण विप्रः स्पृष्टस्तथाविधः।
उभौ स्नानं प्रकुरुतः सद्य एव विशुद्ध्यतः॥

द्वयोरुच्छिष्टयो र्भोजनं कुर्वतो र्ब्राह्मणयोः परस्परं कामकृते स्पर्शे स्नानेन शुद्धिः, अकामकृते त्वाचमनम्। हीनवर्णस्पर्शे दिनमहोरात्रं वा उपोषणं प्रायश्चित्तम्। उच्छिष्टयोः सजातीययोः स्पर्शे कामकृते स्नानमकामकृते त्वाचमनम्।

शातातपः—दन्तलग्ने फले मूले भक्ष्ये स्नेहे तथैव च।
ताम्बूले चेक्षुखण्डे च नोच्छिष्टो भवति द्विजः॥

शङ्खः—रथ्याकर्दमतोयेन ष्ठीवनाद्येन चाप्यथ।
नाभेरूर्ध्वं नरः सद्यः स्नानेन च विशुद्ध्यति॥

आपस्तम्बः - अह्नि शौचं यथाप्रोक्तं रात्रावर्धं तदिष्यते।
पथि पादस्तुविज्ञेय आर्त्तः कुर्याद् यथाबलम्॥

पूर्वोक्तं शौचं दिने पूर्णतः कर्त्तव्यं, रात्रौ तदर्धं करणीयं, मार्गे तदर्धम्, असामर्थ्ये यथाशक्ति कुर्यादेव। शौचं प्रति न विलम्बेत।

बौधायनः - चाण्डालैः पतितैः स्पृष्टो विण्मूत्रे तु कृते द्विजः।
त्रिरात्रन्तु व्रतं कुर्याद् भुक्तोच्छिष्टः षडाचरेत्॥

कामतः चाण्डालस्पर्शे त्रिरात्रम्, अकामत एकाहोरात्रं व्रतं कुर्यात्। उच्छिष्टेन तत्स्पर्शे षड्रात्रमकामतस्त्रिरात्रम्। चाण्डालोदकस्पर्शे स्नानम्।

तदन्नस्पर्शे सान्तापनव्रतम्। सात्स्पर्शानन्तरं शौचमकृत्वैवान्नभक्षणे चान्द्रायणव्रतम्।

ब्राह्मे—चाण्डाल-पतितच्छायास्पर्शे दुष्टा तनुर्भवेत्॥

पराशरः—चैत्यवृक्षश्चिति यूपश्चाण्डालः सोमविक्रयी।
एतांस्तु ब्राह्मणः स्पृष्ट्वा सचैलो जलमाविशेत्॥

चैत्यवृक्षः चितास्थवृक्षः, चिता, यूपः, चाण्डालः, सोमविक्रयी चैते अस्पृश्याः। एतत्स्पर्शे सचैलस्नानं कर्त्तव्यम्। इदं च स्नानं मरणाशौचादीनां मध्येपि आवश्यकम्।

मनुः—सकर्दमासु वर्षासु प्रविश्य ग्रामसंकरम्।
जंघायां मृत्तिकास्तिस्रः पद्भ्यां तु द्विगुणाः स्मृताः॥
रथ्याकर्दमस्पर्शे मृत्तिका जलाभ्यां शुद्धिः।

मार्कण्डेपुराणे—अभोज्य - सूतिका - षण्ढ - मार्जाराखु - श्व - कुक्कुटान्।
संस्पृश्य शुद्ध्यति स्नानादुदक्या - ग्रामसूकरौ॥

म्लेच्छादयोऽभोज्याः। षण्ढो नपुंसकः। मार्जारो विडालः, तस्य कामकृते स्पर्शे स्नानं, विडालेन कृते नाशुद्धिः, 'मार्जारस्तु सदा शुचिः' इति वचनात्। आखुः मूषिकः, श्वा कुक्कुरः, कुक्कुटो मुरगा' इति प्रसिद्धः।

यमः—अजीर्णेऽभ्युदिते वान्ते श्मश्रुकर्मणि मैथुने।
दुःस्वप्नदुर्जनस्पर्शे स्नानमात्रं विधीयते।

श्मश्रुकर्मणि मुखलोमवपने केशवपने च। पर्युषितवान्ते स्नानमपर्युषिते गण्डूषमात्रम्।

कालिकापुराणे—स्पृष्ट्वा रुद्रस्य निर्माल्यं सवासा आप्लुतः शुचिः॥
प्रक्षिप्तं शिवनिर्माल्यं स्पृष्ट्वा स्नानेन शुद्धिरित्यर्थः।

बृहस्पतिः—तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे।
नगरग्रामदाहे च स्पृष्टास्पृष्टि र्न दुष्यति॥

मनुः— ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः ।
यान्यधस्तान्यमेध्यानि देहाच्चैव मलाश्च्युताः ॥

नाभित ऊर्ध्वस्थान्यङ्गानि यानि च खानि च्छिद्राणि तानि मेध्यानि शुद्धानि, ततोऽधस्ताद् यानि च्छिद्राणि तान्यशुद्धानि । शरीराच्च्युताश्च मला अशुद्धाः, शरीराभ्यन्तरे नाशुद्धाः । पवित्रादपि मुखादितो निःसृतानि लालादीनि अशुद्धानि । पवित्राण्यपि च्छिद्राणि अभ्यरे स्पृष्टान्यशुद्धापादकानि । मुखे यावन्निर्लोम ओष्ठपर्यन्तं तावतः स्पर्श उच्छिष्टं सलोमस्थानस्पर्शे तु नोच्छिष्टम् ।

अभक्ष्यभक्षणागम्यागमन - प्राणिवधादिप्रशुक्ताशचीनां प्रायश्चित्तेन शुद्धिः । प्रायश्चित्तानि तु ग्रन्थान्तरे द्रष्टव्यानि ।

अथासन-शय्यादिशुद्धिः

बौधायनः- आसनं शयनं यानं नावः पन्थास्तृणानि च ।
मारुतार्केण शुद्ध्यन्ति पक्वेष्टकचितानि च ॥
आसनं शयनं यानं जायाऽपत्यकमण्डलुः ।
शुचीन्यात्मन एतानि परेषां न शुचीनि तु ॥

मरुता वायुना, अर्केण सूर्यरश्मिभिश्च । पक्वेष्टकरचितगेहादीनि । आत्मनः स्वकीयानि । सामान्याशुचित्व एवम् । अत्यन्ताशुचित्वे तु क्षालनेनैव शुद्धिः ।

यमः— आसनं शयनं यानं स्त्रीमुखं कुतुपं क्षुरम् ।
न दूषयति विद्वांसं यज्ञेषु चमसं तथा ॥

आसनं मलिनमपि, शयनं शय्या अन्यदीयापि, कुतुपं श्राद्धे प्रशस्तवेला अन्यकर्मस्वपि विद्वांसं न दूषयति । क्षुरमन्यशिरोमुण्डनेनापि । स्त्रीमुखं रतिकाल एव । चमसं यज्ञेष्वेव ।

अङ्गिराः- शयनासनयानानि रोमबद्धानि यानि तु ।
वस्त्राण्येतानि सर्वाणि संहतानि प्रचक्षते ॥

एतानि दूषितान्यपि वातसम्पर्केण शुद्धानि भवन्ति ।

यमः- कृष्णाजिनानां वालैश्च वालानां मृद्भिरम्भसा ।
गोमूत्रेणास्थिदन्तानां क्षौमानां गौरसर्षपैः ॥

वालैः चामरैः परिमार्जनेन शुद्धिर्भवति ।

अथ वस्त्रशुद्धिः

देवलः– तावन्तं मलिनं पूर्वमद्भिः क्षारैश्च शोधयेत् ।
अंशुभिः शोषयित्वा वा वायुना वा समाहरेत् ॥
ऊर्णापट्टांशुकक्षौमदूकूलाविकचर्मणाम् ।
अल्पाशौचं भवेच्छुद्धिः शोषणप्रोक्षणादिभिः ॥

सामान्यतया मलिनवस्त्राणाम् अद्भिर्जलेन, क्षारैः ऊषैश्च शोधयेत्, ततो वायुना आतपे वा शोषयित्वा व्यवहरेत् । ऊर्णादिवस्त्राणाम् आविकचर्मणां मेषाजादिचर्मणां च स्वल्पशुद्ध्यैव व्यवहारः कर्त्तव्यः। तेषामातपे शोषणं, जलेन वा प्रोक्षणं कार्यम् ।

व्यासः— अच्छिन्नाग्रं च यद् वस्त्रं मृदा प्रक्षालितं च यत् ।
अहतं धातुरक्तं च तत्पवित्रमिति स्थितिः ॥

ब्रह्मपुराणे—प्रत्यहं क्षालयेद् वस्त्रं दैवे पित्र्ये च कर्मणि ।
सर्वं विण्मूत्रशुक्रैश्च दूषितं तु मृदम्बुभिः ॥

परिधानवस्त्राणां प्रतिदिनं जलेन क्षालनम् । मूत्रादिसम्पृक्तानां तु मृदा ऊषेण जलेन च शुद्धिः ।

मनुः— अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् ।
प्रक्षालनेन स्वल्पानामद्भिरेव विधीयते ॥

दीर्घवस्त्राणामुच्छिष्टाद्यापन्नानां जलेन प्रोक्षणम् । स्वल्पानां तु ऊषेण अरिष्टफलेन वा क्षालनम् । अरिष्टफलं तु "रीठी" इति प्रसिद्धम् ।

यमः–यदि मूत्रपुरीषाभ्यां रेतसा रुधिरेण वा ।
चैलं समुपहन्येत अद्भिः प्रक्षालयेत्तु तत् ॥

यद्यम्भसा न शुद्ध्येत्तु वस्त्रं चोपहतं दृढम् ।
छेदनं तस्य दाहो वा यावन्मात्रमुपहन्यते ॥

यदि क्षालनेनापि मलिनता दुर्गन्धित्वादि नापैति तदा यावत्पर्यन्तं पुरीषादिसम्पृक्तं तावत्पर्यन्तं छेदयेत् ।

मरीचिः — "क्षारोदकाभ्यां कार्पास-शाणमयानां, पुत्रञ्जीवारिष्टकैः क्षौम-दुकूलानां, पुत्रञ्जीवोदश्विद्भिश्चीनानां; श्रीफलश्वेतसर्षपैः कौशेयानाम्, उदश्विद्वल्मीकमृदा ऊर्णानाम्" ।

क्षार ऊषमृत्तिका, कार्पासमयं 'सूती' इति ख्यातं, शाणमयं शणनिर्मितं, पुत्रञ्जीवः 'पितौँझिया' इतिख्यातः, अरिष्टः 'हैँठा' 'रीठा' इति ख्यातः, क्षौम 'अण्डीवस्त्र' इति ख्यातम्, उदश्वित् तक्रं, चीनं 'मलमल' इति ख्यातं, कौशेयं 'रेशमी' इतिख्यातम ।

अथ गृहशुद्धिः

संवर्त्तः— गृहशुद्धिं प्रवक्ष्यामि अन्तःस्थशवदूषिते ।
प्रोत्सृज्य मृन्मयं भाण्डं सिद्धमन्नं तथैव च ॥
गृहादपास्य तत्सर्वं गोमयेनोपलेपयेत् ।
गोमयेनोपलिप्याथ छागेन घ्रापयेद् बुधः ॥
ब्राह्मणैर्मन्त्रपूतैश्च हिरण्यकुशवारिणा ।
सर्वमभ्युक्षयेद् वेश्म ततः शुद्ध्यत्यसंशयम् ॥

शवचाण्डालाद्यतिक्रान्ते गृहे सिद्धान्न-जलव्यहृतानि मृद्भाण्डानि सिद्धान्नानि च अशुद्धानि भवन्ति । अस्पृश्यप्रविष्टे गृहेऽप्येवमेव । मृतकस्य मरणात् पूर्वं यत् शयनगृहं, पाकगृहं च तद्विशेषतोऽशुद्धं, तत्सपिण्डानां पाकगृहं च । एतद्गृहाणां भूमि-भित्तीनामुपलेपनम् । तदितरगृहाणां भूमेरुपलेपनम् । सर्वगृहाणां जलव्यवहृतभाण्डादीनां त्यागः । पक्वेष्टकचितगृहस्य अभ्युक्षणं तद्भूमेरुपलेपनम् ।

विष्णुः— प्रोक्षणेन तु पुस्तकम् ।

यमः— ब्राह्मणावसथे भूमिर्देवागारे तथैव च ।
मेध्यां चैव सदा मन्ये गवां गोष्ठे तथैव च ॥

तेन ब्राह्मणगृहादौ वृथा शङ्कयाऽशुद्धि र्न मन्तव्या । गृहोपरि गृध्राद्युप-वेशने हवनादिशान्तिप्रकारो ग्रन्थातरे द्रष्टव्यः ।

अथान्नादिशुद्धिः

मरीचिः-- "पयसा दन्तानां, क्रीतानामवहनन-निष्पवनै र्व्रीहियवानां, गोधूमानां घर्षण-दलन-पेषणैः, शमीधान्यानां कण्डनावमृशनप्रक्षालनैः, फलीकृतानां घर्षण-प्रक्षालन-पर्यग्निकरणैः, शाकमूलफलानां भूस्थग्रहणे प्रक्षालनैरिक्षुदण्डानां, शमीधान्यवद् यज्ञहविषां, श्रपणमेव स्नेहानां, पुनःपाककृतलवणानां पुष्कशादिभिः स्पृष्टानां भूस्थानां तृणकाष्ठानामादित्यदर्शनाच्छौचम्" ।

दन्तानां हस्त्यादीनां, पयसा जलेन, अवहननं कुट्टनं, निष्पवनं स्फोटनं, शमीधान्यं शिम्बीभवं मुद्गादि, फलीकृतानां निस्तुषीकृतानां तण्डुलादीनां, शाक-मूल-फल-प्रभृतीनामिक्षुदण्डानां च क्षालनेन, श्रपणमधिश्रयणं, पुनःपाकेन लवणानां शौचमित्यन्वयः ।

देवलः— पक्वानां सर्वद्रव्याणां लवणस्य गुडस्य च ।
नान्यच्छौचं परित्यागादशुद्धानामिति स्थितिः ॥

अत्यन्तदूषितं सिद्धान्नादि त्याज्यम् । अल्पदूषिते तु शुद्धिः कार्या ।

देवलः— उच्छिष्टाशुचिभिः स्पृष्टमद्रवं शोध्यमम्भसा ।
द्रवं वापि प्रभूतं स्याद् यच्छोध्यं प्रोक्षणादिभिः ॥

उच्छिष्टैरशुचिभि र्वा स्पृष्टमसिद्धान्नं जलेन प्रक्षालयेत्, प्रभूतत्वे तु प्रोक्षणं कुर्यात् ।

शातातपः—तापनं घृततैलानां पावनं गोमयस्य च ।
तन्मात्रमुद्धृतं शुद्ध्येत् कठिनं तु पयो दधि ॥

घृततैलादीनां स्नेहद्रव्याणां तापनेन शुद्धिः। दध्यादीनां दूषितभागत्यागेन शुद्धिः। प्रभूतानां तु प्रोक्षणेन। अस्पृश्यस्पर्शिनां तदन्नस्पर्शेऽशुद्धः, न तु तत्स्पर्शिनां तृतीयकक्षागतानां स्पर्शेऽपीति।

शातातपः—अशुचिं संस्पृशेद् यस्तु एक एव स दुष्यति।
तं स्पृष्ट्वान्यो न दुष्येत्तु सर्वद्रव्येष्वयं विधिः॥
संहतानां तु पात्राणां यदेकमुपहन्यते।
तस्य तच्छोधनं प्रोक्तं न तु तत्स्पृष्टिनामपि॥

ब्रह्मपुराणे-- पक्वमन्नं गवाघ्रातं मक्षिकाकेशदूषितम्।
छागघ्रातं च तत् कृत्वा शोध्यं रत्नाम्बुभिः सह॥

'अशुचि हि गवांमुखम्', तेन तत्स्पर्शेऽशुचित्वं, तथाविधमन्नं छागेन घ्रापयेत्, छागमुखं हि पूत भवति, पावकञ्चापि।

यमः-- मक्षिका केशमन्नेषु पतितं यदि दृश्यते।
मूषकस्य पुरीषं वा क्षुतं यच्चावधूलिम्॥
भस्मनाऽभ्युक्ष्य चाऽश्नीयादभ्युक्ष्य सलिलेन वा॥

सिद्धान्ने मक्षिका-केश-मूषकपुरीषपाते तावन्मात्रमुद्धृत्य सभस्मजलेनाभ्युक्ष्य गृह्णीयात्।

काकाद्युपहतस्य मक्षिकाद्युपविष्टस्य सूतक्यादिदृष्टस्य चान्नस्य शुद्धिः किञ्चिदंशपरित्यागेन जलेनाभ्युक्षणेन च भवति--

शातातपः- अभ्युक्ष्य किञ्चिदुद्धृत्य भुञ्जीताप्यविशङ्कितः।
भस्मना वापि संस्पृश्य संमृज्यादुदकेन वा॥

प्रभूतसिद्धान्नं यदि श्वसूकरोष्ट्रादिभिरालीढं स्यात् तदा तदग्रभागं विहाय शेषं छागेनाघ्रापयेत्, ततः स्वर्णस्पृष्टजलेनाभ्युक्षणं कुर्यात्। तेन शुद्धिर्भवति। अल्पान्नस्य तु तथाविधस्य त्याग एव उचितः।

शातातपः- श्वसूकरखरोष्ट्रैश्च यदालीढ़न्तु जम्बुकैः ।
अग्रं विहाय तत्पश्चात् संघृष्टव्यमथाग्निना ॥
छागघ्रातं ततः शुद्धं स्याद्धेमजलसंयुतम् ॥
घृतं तु पायसं क्षीरं तथैवेक्षुरसो गुडः ।
शूद्रभाण्डगतं तक्रं तथा मधु न दुष्यति ॥

शूद्रभाण्डगतमपि घृतादि ग्राह्यम् । पायसमत्र दुग्धम् ।

शातातपः- कन्दुपक्वं स्नेहपक्वं पायसं दधि सक्तवः ।
एतान्यशूद्रान्नभुजां भोज्यानि मनुरब्रवीत् ॥

कन्दुश्चुल्ली, साक्षादग्निपक्वम्, घृतपक्वं, दुग्धं, दधि, सक्तवश्च शूद्रकृतमपि न दुष्यति ।

यमः— आममांसं घृतं क्षौद्रं स्नेहाश्च फलसंभवाः ।
म्लेच्छभाण्डगता दुष्या, निष्क्रान्ताः शुचयः स्मृताः ॥

अभक्ष्याभोज्यापेयानां विवरण विस्तरभिया न प्रदर्श्यते ।

अथ स्वतःशुद्धानि

मनुः— नित्यं शुद्धः कारुहस्तः, पण्ये यच्च प्रसारितम् ।
ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति स्थितिः ॥

कारोः शिल्पिनो हस्तः, पण्ये हट्टे विक्रयस्थाने, मेध्यं शुद्धम् ।

मनुः- नित्यमास्यं शुचि स्त्रीणां, शकुनिः फलपातने ।
प्रस्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः ॥

काकादिपक्षी फलपातने शुचिः, प्रस्रवे दोहकाले क्षीरप्रक्षरणे वत्समुखं शुचि, मृगग्रहणे पश्वादिग्रहणे श्वा कुक्कुरः शुचिरेव ।

मनुः— मक्षिका विप्रुषश्छाया गौरश्वः सूर्यरश्मयः ।
रजो भूर्वायुरग्निश्च स्पर्शे मेध्यानि निर्दिशेत् ॥

अमेध्यस्पर्शिनी मक्षिका, मुखनिःसृतसूक्ष्मविन्दवः, अस्पृश्यच्छाया, चाण्डालादिस्पृष्टापि गौः, तथाविधोऽप्यश्वः, सूर्यकिरणाः, धूलकणाः, पृथ्वी, वायुरग्निश्च एते नाशुद्धाः, अपि तु सदैव शुद्धा एव।

अत्रिः— मक्षिकाः सन्तता धारा भूमिस्तोयं हुताशनः।
मार्जारश्चापि दर्वी च मारुतश्च सदा शुचिः॥

शातातपः—गोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः।
अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च॥

गोकुले गोष्ठे, कन्दुशालायां पाकशालायां, आतुरोऽसमर्थः। अमीमांस्यानि अविचारणीयानि, शुद्धान्येव मान्यानि।

शातातपः- रेणवः शुचयः सर्वे वायुना समुदीरिताः।
अन्यत्र रासभाजाविश्व-सम्मूहनीवाससाम्॥

रेणवो धूलिकणाः। गर्दभाज-मेष-कुक्कुर-मार्जनीवस्त्राणां षण्णां धूलयोऽशुचयः। तद्भिन्नाः शुचय इति भावः।

बृहस्पतिः-- पादौ शुची ब्राह्मणानामजाऽश्वानां मुखं शुचि।
गवां पृष्ठानि मेध्यानि सर्वगात्राणि योषिताम्॥

देवलः- गोशकृच्छुद्धदेशस्थं श्मशानादुद्धृतं शिवम्।
अग्राम्या मृद् भवेच्छुद्धा शुक्रविण्मूत्रवर्जिता॥
पृष्ठतो गौ र्गजः स्कन्धे सर्वतोऽश्वः शुचिस्तथा।
गोः पुरीषञ्च मूत्रं च नित्यं मेध्यमिति स्थितिः॥
मुखवर्जं च गौः शुद्धा मार्जारः क्रमणे शुचिः।

अग्राम्या मनुष्यगृहपार्श्ववर्त्तिभिन्ना। मेध्यं शुद्धम्।

यमः- गौरश्वो विप्रुषश्छाया मक्षिकाः शलभाः शकाः।
अजो हस्ती जलं पण्यं रश्मयश्चेन्दुसूर्ययोः॥
शुचिरग्नीरजो वायुरापो दधि घृतं पयः।
सर्वाण्येतानि शुद्धानि स्पर्शमेध्यानि नित्यशः॥

विप्रुषो मुखनिःसृताः सूक्ष्मविन्दवः। चाण्डालादेश्छाया तु अशुद्धैव। एतानि शुद्धस्वभावेन अशुचिस्पृष्टान्यपि शुद्धान्येव।

अथ सुवर्णादिद्रव्यशुद्धिः

ब्राह्मे-- सुवर्णरूप्यशङ्खाश्म-शुक्तिरत्नमयानि च।
कांस्यायस्ताम्ररैत्यानि त्रपुशीशमयानि च॥
निर्लेपानि विशुद्ध्यन्ति केवलेनोदकेन तु।
सलेपानि तु शोध्यानि त्रिधा क्षाराम्लवारिभिः॥
सूतिका-शव-विण्मूत्र-रजस्वलाहतानि च।
प्रक्षेप्तव्यानि तान्यग्नौ यच्च यावत् सहेदपि॥

अश्म प्रस्तरम्। अयो लौहम्। रैत्यं पित्तलम्। त्रपु रङ्गं 'राङ' इति प्रसिद्धम्। शीशमयानि काचनिर्मितानि। निर्लेपानि अनुपहतानि। सलेपानि उपहतानि। क्षार ऊषो भस्म वा 'छाउर' इति प्रसिद्धः। अम्लः रसविशेषः 'आमिल' इति प्रसिद्धः। म्लेच्छाद्युच्छिष्टपात्राणामपि वह्नौ शुद्धिः।

शङ्खः-- ऊष्णोदकेन ताम्रस्य शीशस्य त्रपुणस्तथा।
क्षारेण शुद्धिः कांस्यस्य लौहस्य च विनिर्दिशेत्॥
सूतिकोच्छिष्टभाण्डस्य सुरामद्यहतस्य च।
त्रिःसप्तमार्जनैः शुद्धिर्न तु कांस्यस्य भाजने॥

सुरा द्राक्षादिनिर्मिता, मद्यं तालरसादिनिर्मितं, ताभ्यां हतमशुचि, तस्य पात्रस्य दशवारं क्षराम्लजलैः क्षालनेन शुद्धिः। कांस्यस्य तु पुनर्घटनमेव। तत्र गण्डूषा-पादशौचादिकरणेपि पुनर्घटनमेव। शूद्रोच्छिष्टे तु चतुर्वारं मार्जनैः शुद्धिः।

देवलः-- लौहानां दहनाच्छुद्धिः भस्मना गोमयेन वा।
दहनात् खननाद् वापि शैलानामम्भसापि वा॥
काष्ठानां तक्षणाच्छुद्धिर्मृद्गोमयजलैरपि।
मृण्मयानां तु पात्राणां दहनाच्छुद्धिरिष्यते॥

लौहभाजनानामुच्छिष्टानां भस्मना गोमयेन वा शुद्धिः, अत्यन्तोपहतानां दहनादिना। शैलानां प्रस्तरभाजनानां जलेन, भस्मना, वह्निना वा शुद्धिः। काष्ठपात्राणां सामान्याशुचित्वे जलेन, अधिकाशुचित्वे तक्षणेन, अत्यन्ताशुचित्वे तु त्यागे नैव। मृण्मयानां सामान्याशुचित्वे दाहनेन। अत्यन्ताशुचित्वे त्याग एव।

काश्यपः— "सिकताभि र्दन्त - शृङ्ग - शुक्तीनाम्"॥

हस्तिदन्त-शङ्ख शुक्ति-शृङ्गाणां बालुकया शुद्धिः।

स्मृतिः- मणिवस्त्रप्रवालानां मुक्ताशङ्खोपलस्य च।
सिद्धार्थकानां कल्केन तिलकल्केन वा पुनः॥

सिद्धार्थकः श्वेतसर्षपः तस्य कल्केन 'खरि' इति प्रसिद्धेन।

मनुः- चरूणां स्रुवस्रुवाणां च शुद्धिरुष्णेन वारिणा।
स्फ्यशूर्पशकटानां च मुसलोलूखलस्य च॥
चैलवच्चर्मणां शुद्धि र्वैदलानां तथैव च।
शाकमूलफलानां च धान्यवच्छुद्धिरिष्यते॥

स्फ्यो यज्ञीयः खादिरः खड्गः। शूर्पः 'कोनिआ' इति प्रसिद्धः। चर्मणां मृगचर्मादीनां, वैदलानां वंशपात्राणां च शुद्धि र्वस्त्रवत् प्रोक्षणेन, क्षारतोयेन वा भवति।

अथ भूमिशुद्धः

याज्ञवल्क्यः- भूशुद्धि र्मार्जनाद् दाहात् कालाद् गोक्रमणादपि।
सेकनोल्लेखनाल्लेपाद् गृहं मार्ज्जनलेपनात्॥

संमार्जनात्, दाहात्, अशुद्धिकालक्षेपणात्, गवां पादपरिघट्टनात्, जलगोमूत्रादिसेकात्, मृत्तिकापसारणात्, गोमयोपलेपाच्च भूशुद्धि र्भवति।

देवलः- दहनं खननं भूमेरुपलेपन - वापने।
पर्जन्यवर्षणं चेति शौचं पञ्चविधं स्मृतम्॥

वापनं मृदन्तरेण पूरणम् । पर्जन्यवर्षणं वृष्टिः ।

विष्णुपुराणे- वल्मीक-मूषकोत्खातां मृदमन्तर्जलां तथा ।
शौचावशिष्टां गेहाच्च नादद्याल्लेपसम्भवाम् ।।
अन्तः प्राण्यविपन्नां च हलोत्खातां नराधिप ।
परित्यजेन्मृदस्त्वेताः सकलाः शौचसाधने ।।

यमः- आहरेन्मृत्तिकां विप्रः कूलादसिकतां तथा ।
नाखूत्कृष्टान्न वल्मीकान्न पांशो र्न च कर्दमात् ।
न मार्गान्नोषराच्चैव मृदं गृह्णीत बुद्धिमान् ।।

शातातपः- रक्ता गौरी तथा श्वेता त्रिविधा मृत्तिका स्मृता ।।

वल्मीको दिवाड़" इति प्रसिद्धः । अन्तःप्राण्यविपन्नां सकीटाम् । असिकतां चिक्कणाम् । एता मृत्तिकाः शौचाद्युपयोगिन्यः ।

अथ जलशुद्धिः

मनुः- आपः शुद्धा भूमिगता वितृष्णा यत्र गौर्भवेत् ।
अव्याप्ताश्चेदमेध्येन गन्धवर्णरसान्विताः ।।

गो.पिपासानिवृत्तियोग्या तदधिका च आपो जलं भूमिस्थिता, अशुद्धवस्तुरहिता स्वच्छा शुद्धा, अन्यथा अशुद्धा ।

बृहस्पतिः- सूर्येन्दुरश्मिपातेन मरुतः स्पर्शनेन च ।
गवां मूत्रपुरीषाभ्यां शुद्ध्यन्त्याप इति स्थितिः ।।

देवलः- उद्धृता वा प्रशस्यन्ते शुद्धैः पात्रैर्यथाविधि ।
एकरात्रोषितास्तास्तु त्याज्या आपः समुद्धृताः ।

उषिताः पर्युषिता इत्यर्थः ।

स्कान्दे- वर्ज्यं पर्युषितं तोयं वर्ज्यं पर्युषितं दलम् ।
अवर्ज्यं जाह्नवीतोयमवर्ज्यं तुलसीदलम् ।।

उद्धृतं जलमेकरात्रेण पर्युषितं भवति तत् त्याज्यं, किन्तु गङ्गाजलं पर्युषितमपि अत्याज्यमेव।

देवलः-- अक्षुब्धानामपां नास्ति प्रस्रुतानां च दूषणम् ।
स्तोकानामुद्धृतानाञ्च कश्मलैं दूषणं भवेत् ॥

अगाधानां प्रस्रवणशीलानां च जलानामशुचिस्पर्शेऽपि दूषणं नास्ति। किन्तु अल्पानाम् , उद्धृतानां च तथा सति दूषणं स्यादेव।

यमः-- प्रपामरण्ये घटकं च कूपे द्रोणीजलं कोशगतास्तथापः।
ऋतेऽपिशूद्रात् तदपेयमाहुरापद्गतो भूमिगतं पिबेत् तत् ॥

अरण्ये निर्जनस्थाने कारितायां प्रपायां पानीयशालायां जलपानार्थं स्थापित-धमार्थघटस्थं जलं ब्राह्मणेन न पातव्यम्। कूपाद् जलोद्धाराय नियुक्तं पात्रं घटकं, द्रोणी काष्ठाम्बुवाहिनी 'करीन' इति प्रसिद्धा, कोशश्चर्मपुटः। आपत्काले तज्जलं भूमौ निधाय, तत उद्धृत्य पिबेदित्यर्थः।

हारीतः-- "रात्रावेता वरुणं प्राविशँस्तस्मान्न रात्रौ गृह्णीयात्। धाम्नो धाम भात्युपरिष्टादग्निं धारयन् गृह्णीयात्"।

रात्रौ वह्निप्रकाश एव जलमुद्धरेदित्यर्थः।

यमः-- अजा गावो महिष्यश्च मानुषी च प्रसूतिका।
दशरात्रेण शुद्ध्यन्ति भूमिष्ठं च नवोदकम् ॥

प्रसूतिकानाम् अजा-गो-महिषीणां दशरात्रानन्तरं स्पर्शे दुग्धपाने च नाशुद्धिः, तदभ्यन्तरे त्वशुद्धिः। मानुष्यः सर्ववर्णाः दशरात्रानन्तरं स्पृश्या भवन्ति। वृष्ट्यादिना सञ्चितं भूमौ नूतनं जलं च दशरात्रानन्तरं शुद्धं भवति।

बृहस्पतिः- वापीकूपतडागेषु दूषितेषु विशोधनम् ।
घटानां शतमुद्धृत्य पञ्चगव्यं ततः क्षिपेत् ॥

आपस्तम्बः- उपानच्छ्लेष्मविण्मूत्रस्त्रीरजो मद्यमेव च ।
एभिश्च दूषिते कूपे कुम्भानां षष्टिमुद्धरेत् ।।

बृहस्पतिः—श्वभिः श्वपाक- चाण्डालदूषितेषु विशोधनम् ।
उद्धृत्य सर्वमुदकं मार्जनं परिकीर्त्तितम् ।।

कुक्कुरादिभिः पुरीषे कृते, अत्यन्तोपहते च कूपे वाप्यादौ लघुतड़ागे च सर्वमुदकमुद्धृत्य वह्निप्रज्वालनं कृत्वा पञ्चगव्यं प्रक्षिप्य नवतोयं व्यवहरेत् । प्रवाहमयजले महातड़ागादौ चोपहतदोषो नास्ति ।

विष्णुः— 'महत्सु च न दूषणम्" ।

उपवनविनोदेः--

अञ्जनमुस्तोशीरैः सराजकोशातकामलकचूर्णैः ।
कतक-फल-समायुक्तै र्योगः कूपे प्रदातव्यः ।।

प्रतिवर्षम् एते योगाः कूपे प्रक्षेप्यास्तेन जले दूषणसम्भावना न भवति । नदी-तड़ाग-वापी-कूपादीनां समीपेऽनुपलब्धौ 'येषु स्थानेषु यत्तोयम्' इति वचनान्नलकूपादिजलं व्यवहर्त्तव्यम् । तत्र तस्यानादरकरणमनुचितम् ।

अथ वह्निशुद्धिः

गौतमीये — पाषाणभववह्नि च यदि वाऽरणिसम्भवम् ।
श्रोत्रियाणां गेहजं च वनस्थं चाथवा हरेत् ।।
यदृच्छालाभसंयुक्तो न योग्यो यागकर्मणि ।
निरग्निब्राह्मणाल्लब्धो ह्यर्धलाभकरो भवेत् ।।
क्षत्रबन्धोश्चतुर्थांशं फलं दद्याद्धुताशनः ।
वैश्यात् शूद्राच्च विफलं जायते होमकर्मणि ।।
तस्मात् सर्वप्रयत्नेन वह्निमुक्तं समाहरेत् ।।
व्यासः—'द्विजातिभवनाद् वापि वह्निमानीय साधकः ।।'

पाषाणभवं सूर्यकान्तादिमणिसम्भूतम्, अरणिः काष्ठविशेषः । श्रोत्रियाणामग्निहोतॄणाम् । यदृच्छा अनायासम् । निरग्निः श्रौतस्मार्त्तोभयनित्यहोमवर्जितः । एतच्च यज्ञार्हाग्निविचारः ।

आग्नेये — गार्हपत्यो दक्षिणाग्निस्तथैवाहवनीयकः ।
एतेऽग्नयस्त्रयो मुख्याः शेषाश्चोपसदस्त्रयः ॥

देवलः - अकश्मलैः समृद्धोऽग्नि दुर्मनुष्यैरदूषितः ।
सर्वेषामप्यशुद्धानां समर्थः शोधनाय सः ॥

देवलः - अग्ने वृषलभुक्तस्य ग्रहणं नास्त्यनापदि ।
श्वपाको वृषलो भोक्तुं ब्राह्मणाग्नि च नार्हतः ॥
चाण्डालाग्नेरमेध्याग्नेः सूतिकाग्नेश्च कर्हिचित् ।
पतिताग्नेश्चिताग्नेश्च न शिष्टै ग्रहणं स्मृतम् ॥

आपत्काले एतेऽग्नयो लौकिकव्यवहारे यज्ञेतरकार्ये ग्राह्या नान्यकले। द्विजातयः शूद्रव्यवहृताग्ने र्व्यवहारं न कुर्युः। एवं शूद्रश्चाण्डालश्च ब्राह्मणव्यवहृताग्नि न व्यवहरेत्। चाण्डालादीनामग्नि र्न व्यवहार्यः।

विष्णुः - "नाग्निब्राह्मणयोरन्तरा व्यपेयात्, नाग्न्यो र्न ब्राह्मणयो, र्न गुरुशिष्ययोः। अनुज्ञया तु व्यपेयात्।"

अग्निब्राह्मणयो र्मध्यतो न गन्तव्य, तथैव अग्निद्वयमध्यतो, ब्राह्मणद्वयमध्यतो गुरुशिष्ययो र्मध्यतश्च न गन्तव्यम्। किन्तु तदाज्ञाया गन्तव्यम्।

कूर्मपुराणे—नाशुद्धोऽग्नि परिचरेद्, न देवान् कीर्त्तयेद् ऋषीन्।
न चाग्नि लंघयेद् धीमान् नोपदध्यादधः क्वचित्॥
न चैनं पादतः कुर्याद्, मुखेत च धमेद् बुधः।
अग्नौ न निःक्षिपेदग्नि नाद्भिः प्रशमयेत् तथा॥
न वह्निं मुखनिःश्वासै र्ज्वालयेन्नाशुचि र्बुधः।
स्वमग्नि नैव हस्तेन स्पृशेन्नाप्सु चिरं वसेत्॥
नाक्षिपेन्नोपधमेन्न शूर्पेण, न पाणिना।
मुखेनाग्नि समुन्नीतं, मुखादग्निरजायत॥

स्मृतितत्त्वसमुच्चये -

न सूर्पेण धमेदग्नि न वस्त्रेण न पाणिना।
मुखेनाग्नि समिध्नीयान्मुखादग्निरजायत ॥

मात्स्ये · सामुद्र -सैन्धव - यवा विद्युद्दग्धा च मृत्तिका ।
तयानुलिप्तं यद् वेश्म नाग्निना दह्यते नृप ।।

अथ देशाचारशुद्धिः

मरीचिः - येषु स्थानेषु यच्छौचं धर्माचारश्च यादृशः ।
तत्र तं नावमन्येत धर्मस्तत्र हि तादृशः ।।
येषु देशेषु ये देवा येषु देशेषु ये द्विजाः ।
येषु स्थानेषु यत्तोयं या च यत्र हि मृत्तिका ।।

स्वदेशीया आचारादयो ग्राह्याः, परदेशेऽपि तद्देशीयाचारादयः स्वीकार्याः । तत्रत्या देव - द्विज - जल - मृत्तिका नावमाननीयाः, अपि तु स्वीकार्याः ।

ग्रन्थकारपरिचयः

अस्त्यधिमिथिलं ग्रामो दीपः शिक्षार्थिनां दीपः ।
यत्र च 'मिथिलादीपः' शकटस्थानं विराजते दीपः ।।१।।
संस्कृतशिक्षागारश्चकास्ति सूच्चो महाँश्च यद्ग्रामे ।
श्रीतेजनाथ - विद्वद्वरो गुरु र्यत्प्रतिष्ठाता ।।२।।
तद्ग्रामरत्नवासी 'बुधवाल'कुलाब्धीन्दुवर्योऽसौ ।
गौरीनाथतनूज - श्रीगङ्गानाथपुत्रो यः ।।३।।
स्वग्रामलब्धविद्यो विद्यावारिधिपदाङ्कितो विज्ञः ।
श्रीश्यामसुन्दराच्च स्वधिगतविद्यो हि तेजनाथाच्च ।।४।।
अध्यापयन् हि शिष्यानधिदरभङ्गं सदोच्चवर्गीयान् ।
श्रीशशिनाथो व्यलिखत् सप्त--खन-वशशिशवाब्दके शुद्धिम् ।।५।।

पश्यन्तु धर्मधीराः प्रमुदितचेता गतद्वेषाः ।
प्रीणातु सान्नपूर्णा मत्कृतिधर्मप्रचारेण ।।६।।

इति श्रीमद्विद्यावारिधि(डा०) शशिनाथझा शर्मप्रणीताशुद्धिकौमुदी समाप्ता ।।

14885

कामेश्वरसिंह-दरभंगा-संस्कृत-विश्वविद्यालय
कामेश्वरनगर, दरभंगा

विक्रेतव्य पुस्तकें

क्र० सं०	पुस्तक नाम	लेखक एवं सम्पादक	मूल्य
१	विद्यापति-संस्कृत-ग्रन्थावली---		
(१)	प्रथमभाग (हिन्दीअनुवादसहित) (विभागसार एवं शैवसर्वस्वसार)	स० (१) डॉ० जयमन्त मिश्र (२) डॉ० इन्द्रकान्त झा	७५।-
(२)	द्वितीय भाग (हि.अ.स.) (शैवसर्वस्वसार-प्रमाणभूत-पुराणसंग्रह एवं दानवाक्यावली)	स० (१) डॉ० जयमन्त मिश्र (२) प० श्री आनन्द झा	७५।-
२	म० म० गोकुलनाथ-ग्रन्थावली---		
(१)	रसमहार्णवः	स० (१) प० श्री धर्मनाथ झा (२) प० श्री कुमुदनाथ मिश्र	६।-
(२)	आलोकमंगलविचारः	स० ,, ,, ,,	२०।-
(३)	मासमीमांसा	(१) प० श्री धर्मनाथ झा	६।-
(४)	अनुमितिदीधितिविद्योतः	स० (१) ,, ,, ,, (२) प० श्री रामसेवक झा	७।-
(५)	गोकुलनाथग्रन्थगुच्छः (दिक्कालनिरूपणम् रूढिव्याख्या-रहस्यम् मिथ्यात्वनिरूपणञ्च)	स० ,, ,, ,,	७।-
(६)	कुण्डकादम्बरी	स० (१) प० श्री धर्मनाथ झा (२) प० श्रीकुमुदनाथ मिश्र संशोधक-विद्यावारिधि प० श्री रामचन्द्र झा	२०।-
(७)	तत्त्वचिन्तामणौ उपमान-रश्मिचक्रम् (म० म० गोकुलनाथः)	स० (१) प० श्री रामसेवक झा (२) प० श्री रामचन्द्र झा	

३ म० म० वाचस्पतिग्रन्थावली---

(१) कृत्यप्रदीपः	स० (१) डॉ० जयमन्त मिश्र (२) प० श्री धर्मनाथ झा संशोधक प० श्री कृष्णानन्द झा	२४।=
(२) श्राद्धचिन्तामणिः—	स० (१) डॉ० जयमन्त मिश्र (२) प० श्रीधर्मनाथ झा (३) प० श्रीरामचन्द्र झा	३०।-
(३) आचारचिन्तामणिः—	स० (१) डॉ० जयमन्त मिश्र (२) प० श्रीधर्मनाथ झा (३) प० श्रीकृष्णानन्द झा (४) प० श्रीशशिनाथ झा	३५।-
(४) पितृभक्तितरङ्गिणी (प्रायश्चित्तव्यवस्थासारसमुच्चयसहिता)	(१) प० श्रीरामसेवक झा प्रभृति (२) प०श्रीप्रभुनारायणशर्मा प्रभृति	२५।=
(५) कृत्यमहार्णवः	(१) प० श्रीरामसेवकझा प्रभृति	३०।-
(६) व्यवहारचिन्तामणिः	प० प्रभुनारायणशर्मा प्रभृति	१७।-

४ सुलभसंस्कृतग्रन्थमाला---

(१) मेघदूतम् (गुटका मूल)	प० श्री रामचन्द्र मिश्र	० ५०
(२) हर्षविजयम् (प्रथमसर्गः)	,, ,, ,,	१।-
(३) रघुवंशम् (मूलमात्र सम्पूर्ण)	,, ,, ,,	४।=
(४) समासशक्तिदीपिका —	ले० महावैयाकरण दीनबन्धु झा	५।=
(५) उपसृष्टधात्वर्थसंग्रहः	ले० ,, ,, ,, डॉ० शशिनाथ झा	६।-
(६) मेघदूतम् (जगद्धरीयरसदीपिनी-व्याख्योपेतम्)	स० डॉ० हृषीकेश झा	१२।-
(७) कुमारभार्गवीयम् भानुदत्तकृतम्	स० प० श्रीरामचन्द्र मिश्र	२५।-
(८) ध्वनिकल्लोलिनी-- (हिन्दी अनुवादसहित)	ले० अनु० प० श्रीआनन्द झा	२५।=
(९) विज्ञानं समाजश्च	ले० डॉ० सरयू प्रसाद गुप्त सं० वि० वा० रामचन्द्र मिश्र	२५।-
(१०) सुभाषितावली (हिन्दी अनुवादसहित)	ले० विद्यावाचस्पति प० श्रीउपेन्द्र झा	२०।-

(११) मिथिलामाहात्म्यम्-	सं० प० श्रीधर्मनाथ झा	५।=
(१२) अभिनन्दनमाला-	सं० प० श्रीरामचन्द्र मिश्र	६।=
(१३) छोन्दोगानां विवाहपद्धतिः	सं० प० श्रीतेजनाथ झा	५।-
(१४) मिथिला का इतिहास	ले० डॉ रामप्रकाश शर्मा	७५।-
(१५) स्मृति साहस्त्री	ले० 'रमाकर'	१५।-
(१६) लौकिकन्यायरत्नाकरः	स० प० श्रीरामचन्द्र मिश्र	४५।-
(१७) तिथिनिर्णयः (सपरिशिष्टः)	ले० म० म० राजनाथ मिश्र सं० वि० वा० रामचन्द्र झा	२४।-सजिल्द २०।-अजिल्द
(१८) ग्रहणमाला -	ले० म० म० हेमाङ्गद ठाकुर सं० प० श्री ब्रजकिशोर झा	२०।=
(१९) नियमावली एवं पाठ्यग्रन्थावली-प्रकाशक सं० वि० वि० (दरभङ्गा) (१९८३ से प्रवृत्त)		७।=

५ महाराजाधिराजकामेश्वरसिंह-ग्रन्थमाला--

(१) परमलघुमञ्जूषा (म० म० शशिनाथ झा कृत-सरलाख्यव्याख्योपेता)	सं० (१) वि० वा० श्रीरामचन्द्रमिश्र (२) डॉ० शशिनाथ झा	१५।-
(२) भारतीयसर्वस्वम् (हिन्दीव्याख्योपेतम्)	ले० प० श्री भोलानाथ मिश्र	४५।-
(३) प्रयोगपल्लवः (भवनाथकृतः)	डॉ० शशिनाथ झा	३७।-
(४) तर्कसंग्रहः (न्यायबोधिनी सीता-पद्माव्याख्यासहितः)	प० श्री आनन्द झा	४५।-
(५) शकुन्तलाविवृति	ले० प० श्री आँखी झा स० प० श्री कृपाकान्त ठाकुर	१५।-
(६) उपवनविनोदः- (हिन्दीटीकासहित)	प० श्री कृष्णानन्द झा	१२।-
(७) वातावरणनाटकम् -	मूल० पं० श्रीगोविन्द झा अनु० डॉ० शशिनाथ झा	१२।-
(८) हृत्परिवर्त्तननाटकम् -	प० श्रीआनन्द झा	७।-
(९) म० म० माधवीयाद्भुतदर्पणः	प० श्री रामचन्द्र झा	४५।=

(१०) शुद्धिदीपिका — म० म० कोलेश्वरकृता — २५।-

(११) छन्दोगाह्निकोद्धारः — म० म० शङ्करमिश्रकृतः — १७।-
(श्रीदत्तकृतच्छन्दोगाह्निकं रघुनाथकृतव्याख्योपेतम्)
स० डॉ० प्रभुनारायण शर्मा
डॉ० लक्ष्मीनाथ झा प्रभृति — १७।-

(१२) स्मृतितत्त्वसमुच्चयः — म० म०सचलमिश्रकृतः — ८।-

[१३] स्मृतिदीपिका — म० म० उमापपिकृता डॉ० शशिनाथझाकृत-शुद्धिकौमुदी सहिता — १६।-

यन्त्रस्थ

(१०) न्यायवैशेषिक वार्त्तिकम् — सं० प० श्री अन्तलाल ठाकुर

(२) उणादिरत्नकौमुदी — प० श्री अर्जुन झा

(३) न्यायमञ्जरी (हिन्दी टीकोपेता) — प० श्री आनन्द झा

(४) लघुशब्देन्दुशेखरः ,, ,, — प० श्री ताराकान्त झा

(५) हस्तलेख सूची-·

(६) प्रत्यभिज्ञाप्रदीपः — प० श्री रङ्गेश्वर नाथ मिश्र

(७) रसिकमनोरञ्जिनी — महावै० दीनबन्धु झा

(८) तत्त्वचिन्तामणिः — स० प० श्री आनन्द झा
(आलोक दीपिकाकण्टकोद्धार इत्यादि व्याख्यासहित)

(९) द्वैतनिर्णयः (वाचस्पतिमिश्रः) — डॉ जयमन्त मिश्र

[१०] शुद्धिचिन्तामणिः — ,, ,, ,,

[११] गूढार्थदीपिका — म० म० वामदेवकृता

विशेषः--प्रकाशन की कीमत कुलसचिव कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय, कामेश्वरनगर, दरभंगा के पदनाम से (भारतीय स्टेट बैंक K.S.D.S, शाखा दरभंगा) बैंक ड्राफ्ट द्वारा पहले ही प्रेषणीय है। आदेश के उपरान्त प्रोफोराम देकर भेजा जायगा। अथवा प्रकाशनमूल्य की राशि अग्रिम भेज कर किसी निकटस्थ बैंक के माध्यम से भी मंगवाया जा सकता है।

विशेषः—त्रैमासिक शोधपत्रिका "विश्वमनीषा" १५/रु०वार्षिक [विगत ७ वर्षों से संचालित] मूल्य भेजने पर प्राप्य है।

प्राप्तिस्थान —
प्रकाशन विभाग
कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालय, दरभङ्गा